इह खलु भगवान् कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः श्रीमान् वेङ्कटनाथार्य्यः वेदान्ताचार्यवर्य्यः रहस्यत्रयसाराधिकारार्थसंग्रहेण शिष्यबुद्धिसमाधानं कुर्वन् आदावाचार्यप्रणामरूपं मङ्गलव्याजेन स्वरूपयाथात्म्यज्ञानं प्रार्थयते ।।१।। विद्याभेदे प्रपदनमये पृथगुपायत्वेन प्रमाणप्रसिद्धे प्रपदन इत्यर्थः । स्वार्थे मयट् । तत्र प्रतिष्ठितचेतसः स्थिरचित्तः (स्य) । अनेन महाविश्वासः सूचितः । दयाधनाः कृपामात्रप्रसन्नाः शिष्यानुवृत्तिनिर्निरपेक्षा इत्यर्थः । शठरिपु-शुक-व्यास-प्राचेतसादीनां निबन्धनेषु प्रबलेषु श्रमेण सन्तताभ्यासेन परिणतया कर्मज्ञानयोरङ्गत्वात् भक्तेः शक्ताधिकारित्वाच्च अनुपायतया प्रपत्तिरेवानुरूपोपाय इत्येवंविधबुद्ध्या परिपक्वया श्रद्धया शुद्धः निसंशयः आशयो येषांते तथोक्ताः देशिकाः, मम ज्ञानादिगुणरहितस्य, प्रज्ञादायं-प्रकृष्टज्ञानं प्रज्ञा तदोयशेषत्वज्ञानं, पदे पदे प्रतिपदं सन्ततमित्यर्थः, दिशन्तु, यद्वा पद्यते प्राप्यते इति पदं प्राप्य तं प्रति प्रज्ञादायं त्वरारूपं ज्ञानं, अथवा विद्याभेदे प्रपदने अप्रतिष्ठितचेतसः चञ्चलचित्तस्य प्रज्ञादायं अमोघत्वानन्यापेक्षत्वशरण्याभिमतत्वक्षणमात्रनिष्पाद्यत्वादिज्ञानमिह इदानोमेव दिशन्तु । प्रार्थनायां लोट् ।।१।।

CLOSING(w.) : आस्तिक्यवान्निशितबुद्धिरनभ्यसूयः,
सन्दाय[शास्त्र]परिशुद्धमनाः सदर्थी ।
सङ्केतभीतरहितः स तृणेष्वशक्तः
सद्वर्त्तनीमनुविधास्यति शास्वतीं नः ॥७०॥

CLOSING : अर्थविशेषं जिज्ञासुः सङ्केतभीत्या रहितः तृणेषु निस्सारग्रन्थेषु अशक्तः पुरुषः यः सः शास्वतीमविच्छिन्नसम्प्रदायं सद्वर्त्तनीं सन्मार्गमनुविधास्यति सर्वं समञ्जसम् ॥७०॥

रहस्यत्रयसारोऽयं वेङ्कटेशविपश्चिता ।
शरण्यदम्प(दंय)तिविदां सम्मतः समग्रं ह्यतः ॥७१॥

COLOPHON : इति श्रीकवितार्किकसिंहस्य सर्वतंत्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु अधिकारसङ्ग्रहस्तोत्रव्याख्या सम्पूर्णम् ॥०॥

365. कृष्णलहरी

॥ श्री गणेशाय नमः ॥

कदा वृन्दारण्ये विमलयमुनातीरनिकटे,
चरन्तं गोविन्दं हलधरसुदामादिसहितम् ।
अहो कृष्ण स्वामिन् मधुरमुरलीमोहन विभो,
प्रसोदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥१॥

कदा कालिन्दीये हरिचरणमुद्राङ्कितटे,
स्मरन् गोपीनाथं कमलनयनं विस्मितमुखम् ।
अये पूर्णानन्दाम्बुजवदनभक्तैकशरण,
प्रसीदे० ॥२॥

कदाचित् खेलन्तं व्रजपरिसरे गोपतनयैः,
कुतश्चित् सम्प्राप्तं कमपि भजतां तापदलनम् ।
अहो राधाकृष्णं रहसि रसिकं कन्दुकयुगे,
प्रसीदे० ॥३॥

कदाचिद् गोपीनां चकितहसितैः स्निग्धनयनं,
स्थितं गोपीवृन्दे नटमिव सनन्दं सुललितम् ॥
सुराधीशैः सर्वैः स्तुतपदममुं श्रीहरिमहं,
प्रसीदे० ॥४॥

कदा स्वच्छच्छायाश्रितमहमहो तं यदुपतिं,
समाधौ संस्थाप्याचल इव विहायान्यकरणम् ।
अये भक्तोद्धाराम्बुजवदन नन्दस्यतनय,
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥५॥
कदाचित् कालिन्द्यास्तटतरुकदम्बे स्मितमभि—
स्मयन्तं साकूतं धृतवसनगोपीस्तुतपदम् ।
अहो भक्तानन्दाम्बुजवदन नन्दात्मतनय,
प्रसीदे० ॥६॥
कदाचित् कान्तारे विजयसखमिष्टं नृपसुतं,
वदन्तं पार्थाहो नृपसुतसखे बान्धववर ।
भ्रमन्तं विश्रान्तं श्रिततुरगमाद्यं हरिमभि,
प्रसीदे० ॥७॥
कदाहं सम्पूर्णं पुरुषममलं पङ्कजदृशं
घनश्यामं पीताम्बरपरिहितं रामसहितम् ।
अह दीनानाथ त्रिभुवनपरित्राणकुशल,
प्रसीदेत्याक्रोशन्निमिषमिव नेष्यामि दिवसान् ॥८॥
॥ इति श्रीकृष्णलहरी सम्पूर्णं ॥

372. गिरिजेश्वरस्तोत्ररत्नावली

OPENING : ॥ श्रीगणेशाय नमः ॥

शरण्यो लोकानां घटत इह को नु (ऽयस्ं) तदितरो—
न यस्येश स्वान्तं क्षणमपि विना देवदयया ।
प्रपन्नोऽतः शम्भो तव चरणपङ्केरुहमहं,
विहायान्यान् देवान् व्रतबलितपस्तोष्यमनसम् ॥१

CLOSING : ब्रह्मा नागाधिराजस्त्रिदशपतिगुरुः शारदा सारदात्री,
पाराशर्य्यो विशाखो गिरिशमुनिवरो यश्च वाल्मीकिनामा ।
एतेऽपि त्वद्गुणानां वरगुणगणनां नैव कर्त्तुं समर्थाः,
का वार्त्ता मानुषाणां तदिह मितधियां मन्दशक्त्यायुषाञ्च ॥१००॥
स्वभक्तसन्मानसराजहंस नवौषधीनाथकलावतंस ।
दयाम्बुधे शङ्कर नीलकण्ठ प्रसीद विश्वेश्वर विश्ववन्द्य ॥१०१॥

गङ्गाप्रसादेन सुजातपद्यरत्नावलीयं गिरिजेश्वराय ।
सम्पाद्य यत्नेन समर्पितातः प्रसीदताद् भूतपतिर्महेशः ।।१०२

382. त्रिवेणीस्तोत्रम्

OPENING : ।। श्रीगणेशायनमः ।।

मुक्तामपालंकृतमुक्तवेणी भुक्तामपात्राणि निबद्धवेणी ।
मत्तालिकुञ्जन्मकरन्दवेणी श्रीमत्प्रयागे जयति त्रिवेणी ।।१।।
लोकत्रयैश्वर्यनिदानवेणी तापत्रयोच्चाटनबद्धवेणी ।
धर्मार्थकामाकलनैकवेणी श्रीमत्प्रयागे जयति त्रिवेणी।।२।।

CLOSING : श्रीमद्भवानीसकलैकवेणी लक्ष्मीसरस्वत्यभिमानवेणी ।
मातस्त्रिवेणी परतस्त्रिवेणी श्रीमत्प्रयागे जयति त्रिवेणी ।।१०
त्रिवेणीदशकस्तोत्रं सायं प्रातः पठेन्नरः ।
तस्य वेण्यतिसन्तुष्टा विष्णुसिद्धिर्न संशयः ।।११

COLOPHON : इति श्रीशङ्कराचार्यविरचितं वेणीस्तोत्रं सम्पूर्णम् ।।श्री०।।

384. दधिमथीस्तोत्रम्

OPENIN (on f. 2) : ....मानसा ।।
श्रवणकुण्डलमण्डितकुन्तला दधिमथी जगतां विजयं कुरु ।।३।।

× × ×

समिषुवृक्षवनान्तरसंस्थिता मरुनिवासजनप्रियदायिका ।
निगमविद्द्विजवर्य्यसमीडिता दधिमथी जगतां विजयं कुरु ।।६।।

× × ×

CLOSING (on f. 4) : दाधीचानां प्रसादार्थं गोष्ठमाङ्गल्यसन्निधौ ।
प्रादुर्बभौ दधिमति मतिदेषा परात्परा ।।१०।।
इति दधिमतीस्तोत्रं सम्पूर्णम् ।।

403. राधारससुधानिधिस्तवः

OPENING : ।। श्रीमद्राधावल्लभो जयति ।।

यस्याः कदापि वसनाञ्चलखेल····स्य
धन्यातिधन्यपवनेन कृतार्थमानी ।
योगीन्द्रदुर्गमगतिर्मधुसूदनोऽपि,
तस्या नमोऽस्तु वृषभानुभुवो दिशेऽपि ।।१।।

CLOSING : क्वाहं मन्दमतिः क्व चास्ति परमानन्दैकसारं रसं,
श्रीराधाचरणानुभावकथया निस्यन्दमाना गिरः ।
लग्नाः कोमलकुञ्जपुञ्जविलसद्वृन्दाटवीमण्डले,
क्रीडच्छ्रीवृषभानुजापदनखज्योतिच्छटाः प्रायशः ।।६८।।
श्रीराधे श्रुतिभिर्बुधैर्भगवताप्यामृग्यसद्वैभवे,
स्वस्तोत्रं स्वकृपात एव सहजायोग्योऽप्यहं कारितः ।
पाठेनैव सदापराधिनि महन्मार्गे विरुध्य त्वदे—
काशे स्नेहजलाकुलाक्षि किमपि प्रीतिं प्रसादीकुरु ।।२६९।।
अद्भुतानन्दलोभश्च नाम्ना रससुधानिधिः ।
स्तवोऽयं कर्णकलशैर्गृहीत्वा पीयताम्बुधाः ।।२७० ।।

COLOPHON : इति श्रीवृन्दावनेश्वरीचरणकृपामात्रविजृम्भित**श्रीराधारससुधानिधिस्तवः श्रीहित० गोस्वा०** ।।संपूर्ण।।

407. राममहिम्नःस्तोत्रम्

OPENING : ।। श्रीमते रामानुजाय नमः ।।

महामोहावर्त्ते पतितमिह मां ते शरणगं,
शरण्यस्त्वत्तोऽन्यः प्रभवति न कोऽप्यत्र जगति ।
अतस्त्वत्पादाम्भोरुहयुगलमाश्रित्य नितरा—
मितीहे संसाराद्व्रजिननिचयादुद्धर विभो ।।१।।
निजाव्यक्तेनेदं जगदखिलमिच्छादिकरणैः,
समुत्पन्नं धृत्वा वसतु सततं श्रीरघुपते ।
युगान्ते सर्व्वं वै हरसि किल रौद्रेण वपुषा,
त्वमेकः सर्वात्मन् विहरसि न चान्यो गुणनिधे ।।२।।

CLOSING : कामाद्या दुर्जयाश्चेन्मम भवतु पुनर्मुक्तियोषित्सु कामः,
क्रोधश्चेत् पातके वै तव चरणयुगाम्भोरुहे स्याच्च लोभः ।
मोहश्चेद् ध्यानयोगे मम भवतु पुनर्मत्सरो वै ...
त्वत्तोऽन्यद्राम सौख्यस्थमिह नितरां नैव पश्यामि भूमौ ।।४६।।

Colophon : इति श्रीमच्चतुर्भुजाचार्यचरणसरोजनिवसितमनश्चंचरीकस्वादित-चिन्मकरन्दश्रीमद्विजयरामाचार्यविरचितं राममहिम्न समाप्तम् ॥१॥ श्री॥श्री॥

Post-Colophonic : संवत् १९१८ शाके १७८३ लिखतं जगन्नाथ रामानुजदास पठनार्थं गोविन्दरामानुजदास: श्रीजानकीवल्लभचरणारविन्दामध्ये दुधूमध्ये चैत्रे मासि कृष्णपक्षे ८ दीतवार न श्रीरस्तु ॥

417. विष्णु(शिव)महिम्नः स्त्रोत्रम्

OPENING : विष्णूवाच–

महेशानन्ताय त्रिगुणरहिता मेघविमल-
स्वराकारापाराशिवगुणगुणाकारनिवृते ।
निराधाराधारामरवरनिराकारपरमं,
प्रभापूराकारावरपर नमो वेद्यशिव ते ॥१॥॥

CLOSING : इति स्तुत्वा शिव विष्णु विष्णुपूर्णस्य च मुहुः ।
निर्वाणेन्यरसततं कृताञ्जलिपुटस्थिर ॥४१
तदा शिव शिवरूपमादायोवाच सर्वग ।
भिषः यन्नखिलां भूतान् धनराभिरायाशिरा ॥४२॥
मदीयरूपममलं कथं ज्ञेयं भवादृशैः ।
यन्न वेदैरपि ज्ञातं मा सुत्कातदधै शिव ॥४३॥
ततः पुर्नविधि ।

COLOPHON : ईति श्रीपुष्पदन्ताचार्यविरचितं विष्णु महिम्नसंपुर्ण ॥श्री॥ श्रीरस्तु श्री श्री श्री श्री ।

420. श्रीतनयासंग्रहः

OPENING : ॥ श्रीमते रामानुज[ाय] नमः ॥

॥ श्रीमन्नारायणतनया ॥

श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिमिवोद्धवान्त उत्सङ्गेऽनन्तभोगिनः ॥२

॥ लक्ष्मीतनया ॥

नमः श्रीरङ्गनायक्यै यद्भ्रू विभ्रमभेदतः ।
ईशेशितव्यवैषम्यनिम्नोन्नतमिदं जगत् ॥३

Closing मुररिपुपदपद्मं कार्य्यसूनुः शठारिः
शठरिपुपदपद्मं देशिकेन्द्रो यतीन्द्रः ।
यतिवरवरपद्मं रम्यजामातृयोगी,
[गुरु]वरवरपद्मं देशिका मामकाः स्युः ॥४४॥

Colophon : अच्युतशठकोपयतिराज-वरवरनिजगुरुचरणौशरणं प्रपद्ये ॥ इति तनिय संपूर्णम् ॥

॥ गुरुपरम्परा ॥

OPENING : गुरुमुखमनधीत्य प्राह वेदानशेषान्,
नरपतिपरिक्लृप्तं शुल्कमादातुकामः ।
स्वशुरममरवन्द्यं रङ्गनाथस्य साक्षात्,
द्विजकुलतिलकं तं विष्णुचित्तं नमामि ॥५

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्य्यन्तां वन्दे गुरुपरम्पराम् ॥१॥

CLOSING : बकुलाभरणं वन्दे जगदाभरणं मुनिम् ।
यः श्रुतेरुत्तरं भागं चक्रे द्राविडभाषया ॥१०

425. श्रीवानाद्रिनाथप्रपत्तिः (मङ्गलानुशासनम्)

OPENING : ॥ श्रीमते रामानुजाय नमः ॥

रम्योपयंतृमुनिवर्य्यदयानिवासं
रामानुजं यतिपतिं करुणामृताब्धिम् ।
वन्दे मनोज्ञवरदाह्वयमात्मवन्तं,
आजन्मसिद्धपरिपूतचरित्रबोधम् ॥१॥

CLOSING : कान्तोपयंतृमुनिवर्य्यदयानिवासं,
वैराग्यमुख्यमहनीयगुणाम्बुराशिम् ।
श्रीदेवनायकपदप्रणयप्रवीणं
रामानुजं यतिपतिं प्रणमामि नित्यम् ॥१४॥

वैकुण्ठे तु परे लोके श्रिया सार्द्धं जगत्पतिः ।
आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह ।।१५।।

COLOPHON : इति श्रीमद्वानाद्रिस्वामीजी का मङ्गलानुशासन समाप्तम् ।। शुभमस्तु ।।

425 B. वानाद्रिनाथप्रपत्तिः

OPENING : सद्यःप्रबुद्धसरसीरुहतुल्यशोभौ,
सम्पश्यतान्नयनयोर्मुदमादधानौ ।
संसारसागरसमुद्धरणप्रवीणौ,
वानाद्रियोगिचरणौ शरणं प्रपद्ये ।।१।।

CLOSING & COLOPHON : करकृतमपराधं क्षन्तुमर्हन्ति सन्तः,
वरवरमुनिवन्द्यं वानशैलप्रदीपम् ।
प्रथमजगगुरुत्वं प्राणिसंरक्षणार्थं,
अखिलभुवनपोषं आत्मरक्षं क्षम त्वम् (स्व) ।।१५।।

इति वानाद्रिनाथस्य प्रपत्ति सम्पूर्णम् ।। शुभमस्तु ।।

483. ईश्वरविलासकाव्यम्

OPENING : ।। श्रीगणेशायनमः ।। श्रीहयाननो जयति ।।

विद्युद्वल्लिसमानमञ्जुमहसा पीताम्बरोद्योतिनीं,
लावण्यैकललामधामललनां कांचिद्दधानं भजे ।
ह्रीलंभि व्रजयोषितां भवभयाभीलं सलीलं हर-
न्नीलं प्रावृषिजप्रसारितजलश्रीलंघि शोलं महः ।।१।।

CLOSING : आयातः पुरुहूत एष धरणेर्त्रीराग्रणीरीश्वरः,
प्रोद्यद्वारणवारिदैर्हयबलप्रोच्चण्डपूर्वानिलैः ।
शम्पाशक्तिसमूहदीप्तिविसरैः शौर्योष्मविस्तारणै-
स्तद्राणाकहृदुत्थदर्पदहनः शान्तोऽभवत्तावता ।।३७।।

COLOPHON : इति श्रीमदीश्वरविलासे कविश्रीकृष्णकृते राणापराभवो नाम चतुर्दशः सर्गः ।।१४।।

491. सङ्गीतरघुनन्दनम्

('व्यङ्ग्यार्थचन्द्रिका' टीकोपेतम्)

OPENING (ct.): ।। श्रीमते रामानुजाय नमः ।।

वृन्दे तत्पदकमलं यस्य मकरन्दः पुनाति जगदखिलम् ।
उपलं परागलेशश्चेतनतांशोः प्रमा नयति ।।१।।

राजेन्द्रनन्दनविलोचनचञ्चरीक-
संसेव्यमानवदनाम्बुरुहां सखीभिः ।
स्वीयप्रभाजितरमारुचिभिः परीतां,
रासेश्वरीं हृदि भजे निमिराजपुत्रीम् ।।२।।

अशेषाज्ञानतिमिरविध्वंसनदिवाकरम् ।
श्रीरामरासरसिकं जगत्प्राणसुतं नमः ।।३।।

शारदाम्भोजवदनां शारदेन्दीवरेक्षणाम् ।
नमामि शारदान्देवीं शारदेन्दुकरप्रभाम् ।।४।।

सिन्दूरपूरात्यरुणाङ्गलाधरकलाधरम् ।
सन्ध्याम्बरमिवावन्दे गणेश्वरमहावपुः ।।५।।

सीतारामरस्यं मां बोधयन्ति हृदम्बुजे ।
स्थितांस्तान् हरिरूपाक्षीप्रियादाशगुरून् भजे ।।६।।

नत्वा गौरीशपादाब्जं टीका व्यंग्यार्थचन्द्रिका ।
श्रीरामरासरसिकविनोदाय विधीयते ।।७।।

अस्य व्याख्येयग्रन्थस्य परमोत्तमत्वम् । यद्यपि काव्यप्रकाशे उत्तम-मध्यमाधमभेदात् काव्यस्य त्रैविध्यमेवोक्तम्, तथाहि--

इदमुत्तममतिशायिनि विं(व्यं)ग्ये वाच्या ध्वनिर्बुधैः कथितः ।
अ तादस (दृश) गुणीभूत [व्यग्यं] व्यङ्ग्ये तु मध्यमम् ।
शब्दचित्रं वाच्यचित्रमव्यंग्यत्ववरं स्मृतम् ।।

इति तदुदाहरणानि च—

निःशेषच्युतचन्दनं स्तनतटं निर्भृष्टरागोऽधरो,
नेत्रे दूरमनञ्जने पुलिक(लकि)ता तन्वी तवेयं तनुः ।
मिथ्यावादिनि (द्रि)दूतिबान्धवजनस्याज्ञातपीडागमे,
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ।।

OPENING (w.) (on f. 3a) : ॥ श्रीजानकीवल्लभाय नमः ॥

रामप्रेमपयोधिवर्द्धनविधुः शृङ्गाररसारास्पदं,
संसारार्णवदासतारण[त]रिमयातमोदीपिका ।
विद्युद्भासुखवृन्दवर्षणकरी कादम्बिनी काप्यसौ,
मद्धृत्कञ्जनिवासिनी विजयतां श्रीजानकी सर्वदा ॥१॥

× × × × ×

गोविन्दगुरुगुणालीश्रुतिशर्मभवाश्रुमालतीमाल ।
धृतचन्दिर गुणमन्दिर लम्बोदर तावकं पदं वन्दे ॥७॥
विन्ध्ये रिपुगजसिंहो जयसिंहो राजसिंहोऽस्ति ।
तनुते तस्य तनूजो ग्रन्थं सङ्गीतरघुनन्दनाख्यम् ॥८॥
चिरमननसमनुभूतश्रीसीतारामरासंसंयुक्तः ।
सद्यो रसिकजना[नां] हृदयानन्दी भवत्वयं सुचिरम् ॥९॥
नृपबोधवेदक्षितिपालनकारी प्रलयपयोधिसलिलसञ्चारी ।
श्रीरघुवर मीनसुरूप ! जय जगदीशपते ! ॥१॥

CLOSING (ct.) & COLOPHON : रासप्रेमचमत्कारप्रमोदाय महात्मनाम् ।
विन्ध्येशविश्वनाथेन कृता व्यङ्ग्यार्थचन्द्रिका ॥

इति सिद्धिः । श्रीमन्महाराजाधिराजश्रीरामचन्द्रकृपापात्राधिकारि-श्रीविश्वनाथसिंहकृतायां व्यंग्यार्थचन्द्रिकानाम्नि टीकायां षोडशः सर्गः १६॥

CLOSING (w.) & COLOPHON : एषा माधुर्यधारा धरणितलगता विश्वनाथप्रचारा,
भास्वत्सन्तानतारा परिवृढविशदध्यानसंधानसारा ।
पापौघोदंचदारा भवजलधिसमुत्तारणे नौरुदारा,
शृङ्गारैकप्रसारा जयति परगुणग्राहकस्वान्तकारा ॥१॥

इति श्रीमन्महाराजकुमारश्रीविश्वनाथसिंहविरचिते संगीतरघुनन्दने ग्रन्थमाहात्म्यवर्णनपूर्वकंप्रणामादिविधानं नाम षोडशः सर्गः १६ सम्पूर्णम् शुभमस्तु मंगलं दद्यात् ।

Post-colophonic : सम्वत् १९२६ माघशुक्ल ८ कुज ।

500. सुभाषितसंग्रहः

OPENING : ब्राह्मणानां धनं विद्या क्षत्रियाणां धनं रणम् ।
कुलस्त्रीणां धनं लज्जा वेश्यानां यौवनं धनम् ॥१॥
विद्यासमो नास्ति शरीरभूषणं कान्तासमो नास्ति शरीरतोषणम् ।
मातासमो नास्ति शरीरपोषणं चिन्तासमो नास्ति शरीरशोषणम् ॥२॥
पथि चाण्डालकं दृष्ट्वा कुर्यात् सूर्यविलोकनम् ।
यदि सम्भाषणं कुर्यात् गायत्रीं मनसा स्मरेत् ॥१॥
स तं हन्ति सुतं हन्ति हन्ति पुण्यं पुरा कृतम् ।
स्वर्गस्थपितरं हन्ति सभायां कुटिलं वदेत् ॥१॥
अजारजः पर्व्वणि मैथुनानि स्मशानधूमो मठभोजनानि ।
रजोवतीनेत्रनिरीक्षितानि हरन्ति पुण्यानि पुराकृतानि ॥१॥
देशाटनं पण्डितमित्रता च वाराङ्गना-राजसभाप्रवेशः ।
अनेकशास्त्राणि विलोकितानि चातुर्य्यमूलानि भवन्ति पञ्च ॥१॥
कुङ्कुमेन विना कान्ता विप्रस्य तिलकं विना ।
ताम्बूलेन विना राजा स्मशानः शूद्रसम्मुखे ॥१॥

CLOSING : जात्यन्धो नहि वेत्ति रत्नविषयं षण्ढः कुतः स्त्रीसुखम्,
वेश्या सत्पुरुषेण सौख्यपदवीं वन्ध्या प्रसूतीक्रमम् ।
काको हंसगतिं खरो मृदुरवं सौख्यं दरिद्रो यथा,
स्वानः सिंहपराक्रमं च विभवं मूढो महद्ज्ञानिनम् ॥१॥
शतकाञ्चनसमर्थोऽसौ शतग्रामेण भूपतिः ।
शत औषधवैद्यश्च शतश्लोकैश्च पण्डितः ॥१॥
वरं वनं व्याघ्रगजेन्द्रसेविनं(वितं) वरं वनं यत्र फलानि भोजनम् ।
तृणेषु शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥१॥

504. परिभाषाभास्करः

॥ श्रीः ॥

OPENING : आखण्डलादिसुरमण्डलमण्ड....
मुद्दण्डकोकविरहानलदण्डचण्डम् ।
ईडेऽहमत्र बहुबोधितपद्मकाण्डं,
मार्त्तण्डमन्धतमसं प्रति कालदण्डम् ॥१॥

श्रीगुरून् पितरौ नत्वाऽग्निहोत्री भास्कराभिधः ।
भास्करं परिभाषाणां तनुते बालवृद्धये ॥२॥
युक्तायुक्ताभिज्ञं भूयो भूयो विद्वद्वृन्दं .... ।
नामं नामं याचे मन्दो मान्द्यं चेदं शोध्यं सम्यक् ॥३॥
मृद्वी मृद्वीकया तुल्या खरैरिव खलैर्यदि ।
नादृतेयं कृतिस्तस्मादस्माकं हानिरस्ति किम् ॥४॥

तत्र तावद्भाष्यकाष(?)व्यक्तायां वाचीत्यस्मात् परितो भाष्यत इति व्युत्पत्तेः कर्मणि घञुत्पत्तेस्तथा प्रतीतेश्च परिभाषापदं यौगिकम्, न चैवं संज्ञादिष्वतिप्रसङ्गः, निर्मथ्ये नेष्टकाः पचन्तीत्यत्र पाकादौ निर्मथ्य पदस्येव तत्र परिभाषापदस्य प्राचीनप्रयोगाभावात्० ।

CLOSING : किन्त्वारोपित एवेत्याह–राज्ञः पुरुष इत्यादावित्यादिना प्रकृत इत्यन्तेन राज्ञः पुरुष इत्यादौ प्रातिपदिकार्थस्य राज्ञो विशेषणत्वं पुरुषस्य विशेष्यत्वं स्वामित्वेन स्वत्वेन च यथा तयोर्व्यतिरेको रूपान्तरेण परिवर्त्तनात् । न तथा प्रकृत इति त्वदर्थो हरिवचनार्थ इत्याहुः ।

537. रागमञ्जरी

OPENING : श्रीमत्कच्छपवंशदीपकमहाराजाधिराजेश्वर-
स्तेजःपुञ्जमहाप्रतापनिकरो भानुः क्षितौ राजते ।
तस्यासीद् भगवंतदासतनयो वीराधिवीरेश्वरः,
क्षोणीमण्डलमण्डनो विजयते भूमण्डलाखण्डलः ॥१॥
तस्य द्वौ तनयौ ह्यनुक्तविनयौ शूरौ महाधार्मिकौ,
सिंघौ माधवमानपूर्वपदकौ संग्रामदक्षावुभौ ।
तेगत्यागसहस्रहस्तकलितौ श्रीसर्वभूमीश्वरौ ।
.... ॥
अकबरनृपधर्मी शक्रतश्चातिधर्मी,
धरणिगगनमध्ये जंगमौ मध्यमेरुः ।
सकलनृपतितारश्चन्द्रसूराविमौ द्वौ,
जगति जयनशीलौ माधवामानसिंघौ ॥
तत्र माधवसिंघोयं राजा परमवैष्णवः ।
सर्वदा विष्णुभक्त्यर्थं नाट्यारम्भं करोति हि ॥
× × × × × ×

श्रूयमाणे सति राजा—

शुष्काङ्गि घनचार्वङ्गि काकली तव किन्नरी।
वर्द्धमानोल्लसद्रागे विवादयसि तत्कथम् ।।

नानापण्डितमण्डिता सुरसभा श्रीधर्ममूर्त्तिः सभा,
[श्रीमद्]राजकुमारशोभितसभा प्रख्यातनीतिः सभा।
ब्रह्माविष्णुमहेश्वरैः परिचिता सम्पूर्णविद्यासभा,
श्रीमन्माधवसिंहराजरुचिरा शृङ्गारहारा सभा ।।

अगणित गणक-विचिकित्सक-वेदान्तन्यायशब्दशास्त्रज्ञाः।
दृश्यन्ते बहवः सङ्गीती नात्र दृश्यतेऽप्येकः ।।
इत्युक्ते माधवसिंघे विट्ठलेन द्विजन्मना ।
नत्वा गणेश्वरं देवं रच्यते रागमञ्जरी ।।
युष्मदो दक्षमंचस्तु न क्व शस्ति (चास्ति) जगत्त्रये।
किन्नु मत्प्रेमतः सन्तः पुरस्कुरुत मत्कृतिम् ।।
बहुगतिरञ्जकरसिको गुञ्जत्तानक्रियाविपक्षश्च ।
अकश्चरैकरेफो जयति श्रीरागमञ्जरीरसयः ।।
वादश्रुतिस्वरग्राममूर्च्छनातानमण्डितः ।
जनचित्तं रञ्जयति स रागः कथितो बुधैः ।।

CLOSING : बहुरसमकरन्दां सच्चिदानन्दकन्दां,
मुकुलितयासांशिकिंनरीरंगराशाम् (?)।
वरनरमतिमोदां कामिनां श्रीविनोदां,
जनधरश्रुतिदूडां मन्जरीरागचूडाम् ।।१।।
देमकजननोनिजसुतविट्ठलकृतरागमञ्जरीकेयम् ।
सुन्दररक्तिविचित्रा वाग्देवीश्रवणमण्डना भवतु ।।
संगीतार्णवमन्दिरे प्रतिदिनं साहित्यपद्माकर-
प्रोद्भूतप्रबलप्रबोधजनको भासां निधिः साम्प्रतम्।
विद्यावादविनोदिनामतितरामग्रेसरः केसरी,
सोयं माधवसिंहराजतिलको जीयाच्चिरं भूतले ।।

COLOPHON : इति श्रीकर्णाटकजातीय-पुण्डरीकविट्ठलकृता रागमञ्जरी समाप्तेति
।। शुभं भवतु ।।

5 जयपुर म्यूजियम में सुरक्षित आमेर के राजा मानसिंह कछवाहा का
वि० सं० १६६६ का शिलालेख

स्वस्ति श्रीमन्नृपविक्रमादित्यराज्यातीत संवत् १६६६ सालिवाहनशकातीत १५३४ फाल्गुनशुक्ले ५ रविवासरे श्रीमज्जहांगीरसाहिसलेमराज्ये वर्तमाने श्रीरघुवंशतिलक-कछवाह-कुलमंडन-श्रीश्री राजा पृथ्वीराज-तत्पुत्र श्री राजा भारहमल्ल-तत्पुत्र श्री राजा भगवानदास-तत्पुत्र-सकलनरेन्द्रचूडामणि - प्रतापपराभूतसमस्तशत्रुगण-समस्तपृथ्वीविजयप्राप्तमहायशोराशि-विराजमानश्रीमहाराजाधिराज - श्रीमानसिंहनरेन्द्रकारितं रामगढप्राकाराख्यं दुर्गं कूंपारामो-पशोभितं तत्र परमपवित्रश्रीपद्माकरपुरोहितपुत्र-श्रीपुरोहितपीतांबरस्याधिकारसिद्धं ।। तत्र कार्जं निजुक्ता शिल्पिन । एतद्देशीय-निजामश्च ।। अन्ये च तन्मतानुसारिणः ।।

53. रोहतासगढ़ के भीतरी द्वार पर लगे हुए महाराज श्री मानसिंहजी के शिलालेख की नकल
मूल लेख संवत् १६५४

श्रीगणेशाय नम अंभोधीपुरसेन्दुभिः परिमिते पुण्यायने हायने,
चैत्रे मासि बलक्षपक्षबलिते षष्ठ्यां तिथौ शीतगोः ।
बारे सर्वं गिरीन्द्रवंशतिलके श्रीरोहिताश्वाचले,
श्रीमन्मांनमहीमहेन्द्रसदनोद्धारं व्यगात्पूर्णताम् ।।१।।

श्रीमहाराजाधिराज श्रीमानसि[ह] पुरोहितश्रीधराधिकारे भ(म ?)दबलभट्टेन कारितं समरष ।

नोटः—'समरष' शब्द डॉ. राजेन्द्रलाल मित्र के विचार से हिन्दी भाषा के 'स्मरण रख' का अपभ्रंश है ।

मेवाड़ के कस्बा माड़ल में राजा जगन्नाथ कछवाहे की बत्तीस खंभों की छत्री में
लगी हुई प्रशस्ति की नकल
स्वस्ति श्रीगणेशाय नमः ।

यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये । विश्वोद्गतं कारणा-मीश्वरंवा तस्मै नमो विघ्नविनाशनाय ।।१।। हजरत श्रीपातसाह अकब्बरजी की जलालदीन गाजी को पातसाही सलामत श्रीपातसाह हजरति साह सलेम जहांगीर विजयराज्ये पातसाह दिल्लो मुगलत्रेक ताको उमराव महाराज श्रीजगन्नाथजी राजश्री-भारमलसुत कछाहा राजा आमेर का ताकी छत्री संवराय राजश्री अभैकरसिंहजी राजश्रीकरमचन्दसुतः छत्री की प्रतिष्ठा हुई सम्वत् १६७० का बरषे शाके १५३५ प्रवर्त्तमाने मार्गशिर सुदी ११ एकादशी शुक्रवार के दिन श्री सिंहेश्वर महादेव थाप्या सन् १०२२ (हिजरी) मकाम मांड़ल छत्री कराई तमाम राजश्री आसानन्दजी पदमसुत बैसरजसुत पोतदार सहा

धरमदास खंडेलवाल मुसरफी ठाकुर सीतलदास कायथ माथुर बास गढ रणथंभ सूत्रधार माधोगोविन्द रामगढ़ का आज्ञा उदयपुर सूँ पंडित टोड़ा का सुवाई खिजमतदार। श्री शुभं ॥

॥ श्री रामजी ॥

ब्रह्माजी

सिधि श्रीगणेसायनमः महाराजाधिराज महाराजाजी सवाई जैसिंघजीका राज में जोसी जीवारामको प तौ किसनरामको बेटौ स्यंभूरामकी माता बाई फुंदी प्रोहित पीतांबर गंगारामकी पोती प्रोहित गिरधरदासजीकी बेटी देहुरो श्रीब्रह्माजीकी मरम्मत श्री पौहुकरजी में कीयो मिती माह सुदी ५ संवत १७७६ का सुभे भवेत् बाचै जोनें राम राम बंच्यावसि आंवेरिका।

54. आंबेर के कछवाहा राजा मानसिंह के वृंदावन में बनाये हुए श्री गोविन्ददेवजी के मन्दिर में जो उनकी (कछवाह राजा मानसिंह की) प्रशस्ति लगी हुई है, उसकी नकल

श्री वृन्दा(वन)विपिने शिवादिदिविषद्वृन्दावलीवन्दिते,
वैकुण्ठन्निरकुण्ठतारकवनश्रोयोगपीठस्थितः।
श्रीगोविन्दतया श्रुतिस्मृतिसती सन्दोहवृन्दाह्वयः,
श्रीकृष्णः स्वकृपाकृपालन ष्णाक सदा भ्राजते ॥१॥
श्रीमानर्कवरो[1] यदा भुवमपात् संवीतदैवाधुना,
सर्वः सौख्य प्रजाजनगणः स्वं धर्ममुच्चैर्भजन(न्)।
श्रीगोविन्दपदं तदेत[द]पि ते वासाय सद्वैष्णवा,
लम्भं लम्भः ··· ······················ तस्मै सदैवाशिषः ॥२॥
तस्मिंस्तस्य सदान्वितक्षितिपतिः श्रीमानसिंहाभिधः,
पृथ्वीराज विराज ··········· तेस्ये (?) श्चन्द्रमाः।
भूभृद्भारहमल्लजातभगवद्दासात्मजो मन्दिरं,
कुर्वन्निन्दिरयावल··· दाचलयानंदं सदा विन्दताम् ॥३॥
······················ स्तथाविधमहाराजाधिराजोप्यसौ,
येनैवारिदिशंगतेन विजयी ध्वस्तभ्रमः क्रीडति।
स श्रीमानवसिंह ························ न वा,
युद्धे यस्य निपत्य दिव्यपितृपाः कीर्त्तिध्वजत्वं गताः ॥४॥

---

१. अर्कवर=अकबर।

यः कच्छपाधिप[1] जातिरेष विजयी श्रीमानसिंहो नृपः,
.... सदा विजयतां .... दासः सुधोः।
श्रीगोविन्दपदारविन्द ... . स्तन्मन्दिरं संमदा-
त्कुर्वन्नूष्वभमत्र तूर्णं पू......... ....॥५॥
श्रीगोविन्दपद .... श्रीमानसिंहाद्भुतम् ॥६॥
.... भवदाविष्यदखिल श्री वैष्णवानां सुखं
श्री कर्ता हरिणा सदा निज दयाया०
याविनि ....॥७॥
....श्रीग्रसेनः कृती
तौ द्वौ श्रीयुतमानसिंहनृपतिप्रस्थापितौ नन्दताम्।
किंवाग्गनद्ववनीय.......................................
....प्रतिपदं सौख्यंगमहंद्विन्दतु ॥८॥
मुनिवेदर्तुचन्द्राह्वसम्वन्मन्दिरसम्भवे।
....॥९॥
कलिलुप्ता तत... तौ श्रीयुतवृंदावनेशितुः सेवाम्।
श्रीमद्रूप[2]सनातन[3]नामानौ तौ भजेत ....॥१०॥

ऊपर की प्रशस्ति के बगल में चौखंडी के खंभे पर हिन्दी का शिलालेख

संवतु ३४ श्रीशुकवंध ग्रकबरसाहराज्ये कूर्माकुलश्रीपृथ्वीराजाधिराजवंश महाराजश्रीभगवंतदाससुत श्रीमहाराजाधिराजश्रीमानसिंहदेव श्रीवृन्दावनजोगपीठस्थान मन्दिर करायो श्रीगोविंददेवकौ।

वृन्दावन के श्री गोविन्ददेवजी के मन्दिर की बांई बाजू श्री वृन्दादेवी के मन्दिर के बाहिर परिक्रमा में ग्रामेर के कछवाहा राजा मानसिंह का हिन्दी भाषा का शिलालेख।

संवत् ३४ श्री शकबंध ग्रकबरमहाराज श्रीकूर्मकुलश्रीपृथ्वीराजाधिराजवंश-महाराजश्रीभगवंतदाससुत श्रीमहाराजाधिराजश्रीमानसिंहदेव श्रीवृन्दावनजोगपीठस्थान-मन्दिर करायो श्री गोविन्ददेवको काम ऊपरि श्रीकल्याणदास ग्राज्ञा करी माणकचन्द चौपड़ा शिल्पकारी श्रीगोविन्ददास दीलवल (देवल ?) कारि गुरु छः (छै ?) गोरखदास सुबीं भवल (शुभं भवतु ?)

---

१. कच्छाधिपजा = कछवाहा जाति। २. श्रीरूपगोस्वामी। ३. श्रीसनातनगोस्वामी। ये दोनों श्रीचैतन्यसम्प्रदाय के ग्राचार्य ग्रौर श्रीगोविन्ददेव के पुजारी थे।

55. ग्वालियर दुर्ग के चट्टान में खुदे हुये मन्दिर में लगा हुआ शिलालेख

१. ॐ नमो विष्णवे। सम्वत्सरशतेषु नवषु त्रयस्त्रिंषदधिकेषु माघशुक्लद्वितीयाया सं० ६३३ माघ सुदी २ मद्येह श्रीगोपगिरीश्वरमिह—

२. परमेश्वरश्रीभोजदेव-तदधिकृतकोट्टपालमल्लबलाधिकृततुर्कस्थानाधिकृत-श्रेष्ठिवव्वियाकइच्छु-वाकसार्थवाह—

३. प्रमुख-सव्वियाकानां पारे। समस्तस्थानेन कइल्लभट्टसुत-रल्लकारितवृश्चिकालानदी-परकूले रुद्ररुद्राणोपूष्णाषादि-नवदुर्गायतना—

४. य स्वभुज्जमावूय पल्लिकाग्रामप्रतिबद्धभूमिगुणं दैर्घ्येण पारमेश्वरीयहस्तशतद्वयसप्तत्यधिकं हस्त २७० विस्तारेण—

५. हस्तशतमेकं सप्ताशीत्यधिकं हस्त १८७ पुष्पवाटिकार्थं पुण्येहनि प्रदत्तं तथाऽनेनैव स्थाने चास्मिन्नेव संवत्सरे—

६. फाल्गुनबहुलपक्षप्रतिपदि श्रीभोजदेवप्रतोल्यवतारे मल्लेनैव कारितं वाइल्लभट्टश्चा-स्योदपानधिष्ण्यायतनाय तथो—

७ परिलिखितनवदुर्गायतनाय च पूजासंस्कारार्थं स्वभुज्यमानजयपुराकग्रामे व्याघ्रकर्णिका-भिधानहानमूलाकयं—

८. सद्गदाकसुतदल्लकवाहितक्षेत्रं तथास्यैव क्षेत्रस्योत्तरतः क्षत्रियदेववर्मसुत-मेसारकवाहितक्षेत्रं च ययोर्गोपगिरीयमा—

९. प्येनावापो यवानां द्रोण्य एकादश तयोर्द्वयोरपि क्षेत्रयोराघाटः पूर्वेण नई-दाकवाहितक्षेत्रं दक्षिणेन पाहादन्नः—

१०. पश्चिमेन दल्लकवाहितक्षेत्रे पादपाः ततो मम्माकवाहितक्षेत्रं उत्तराभिमुखं वाहकक्षेत्रं परिधिस्तु गतः उत्तरेण वर्त्म—

११. लघुपाहाटिका च एवं चतुराघाटविशद्धं क्षेत्रद्वयं पुण्येहनि प्रदत्तं। तथास्मिन्नेव सम्वत्सरे फाल्गुनबहुलपक्षनवम्यां—

१२. उपरिलिखितदेवकुलाभ्यां द्वाभ्यामपि दीयतेत्मार्थं श्रीसर्वेश्वरपुरनिवासितेलिकमहन्तक-भोचाकसुतसर्व्वस्वाक तथा माधव—

१३. सुत-ज्यशक्ति तथा शिवश्वरसुत ।।हुल्ल तथा गग्गाकसुत गग्गीक। तथा श्रीवत्स-स्वामिपुरनिवासि-तेलिक-मह

१४. न्तककुणुकसुत-सिंधाक तथा वल्लवसुत-खाहदाक तथा चच्चिकाहट्टिका-निंत्रादित्य-हट्टिकयोर्निवासि-तेलिक म—

१५. हन्तक देउवाकसुतजज्जट तथा वच्छिलाकसुतगग्गाक तथा दद्रकसुतजम्बक तथा सद्रटासुतजंवहरि एवमादि—

१६. समस्ततेलिकश्रेण्या प्रतिकोल्हुकं मासि शुक्लनवम्यां शुक्लनवम्यां शुक्लनवम्यां तैल-पल्लिका पलिका दातव्येत्यक्षयिनी—

१७. मया प्रदत्ता। तथाद्यैवामूम्यामेव देवकुलाभ्यां श्रीगोपगिरितलोपरिनिवासि-मालिक-महरगाद्दुल्लसुत-टिक्कक—

१८. तथा देद्दकसुत ज्यसेक तथा बहुलाकसुत-सिद्धक तथा जम्बाकसुत-सहदाक तथा दत्तिसुत दुर्गधरि ननमाकेव्य—

१९. ····मक तथा·····························एवमादिसमस्तमालिकश्रेण्या पूजार्थं ·····················
कालापयिकहभट्ट सुयामा—

२०. ····ल्यापाण ···· पण ······ प्रतिदिनं दातव्येत्यक्षयनामिका प्रदत्ता एतदुपरि लिखित ·······

२१. त्तस्थानादिभि स्वदक्षयायाचन्द्रार्कक्षितिकालं प्रदत्तं परि ·········कैरपि न कर्त्तव्या ······
तथा स्वदत्तां परदत्तां वा यो—

२२. हरेत वसुंधरां। स विष्टायां कृमिर्भूत्वा बन्धुभिः सह मोदते। बहुभि—

२३. यदा भूमिस्तस्य तस्य तदा फलम्।

२४. ·······································।

२५. ·······································।

---

56. कोटा-राज्यान्तर्गत 'कुंवालजी' नामक तीर्थ के कुंड पर लगा हुवा रणथम्भोर के चौहान-राजा हम्मीर का शिलालेख वि० सं० १३४५ का।

शं वो लंबोदरो देयादेककालं कलत्रयोः।
बुद्धिसिद्धयोः स्तनस्पर्शहेतारिव चतुर्भुजः ॥१॥

दद्रुश्रीपदकुष्टदुष्टवपुषामाधिं विनिघ्नन्नृणां,
कारुण्येन समीहितं वितनुतां देवः कपोलेश्वरः।
वामे यस्य चकास्ति चक्रतटिनी पृष्ठे च मंदाकिनी—
तीर्थक्केतुसुखापमाजलवहां कुंडं प्रसिद्धं पुरा ॥२॥

यदन्तिके श्राद्धकृतां कुलकोटिविमुक्तिदः।
अनादिपादपोऽद्यापि दृश्यते किल शाल्मलिः ॥३॥

चाहमाननरेन्द्राणां वंशो विजयतामयम्।
उपायुज्यत यद्दंडं कलौ गोवृषरक्षणे ॥४॥

कलिकालकेसरिकुले तस्य गोचक्ररक्षणे दक्षाः।
अभवन् विजितविपक्षाः पृथ्वीराजादयो भूपाः ॥५॥
तद्वंशे राजानो भानव इव वै बभूवुस्ते।
वाग्भट्टदेवप्रमुखाः जनमुदोल्लासनैकसद्भावाः ॥६॥
ततोऽभ्युदयमासाद्य जैत्रसिंहरविर्नवः।
अपि मण्डप[1]मध्यस्थं जयसिंहमतीतपत् ॥७॥
कूर्म[2]क्षितीशकमठीकठिनोरुकंठ-पीठी[3]विलुंठनकठोरकुठारधारः।
यः कर्करालगिरिपालकपालपालिखेलत्करालकरवालकरो विरेजे ॥८॥
येन झंपाइथाघट्टे[4] मालवेशभटाः शतां(तम्)।
बद्धाः रणस्तंभपुरे क्षिप्ता नीताश्च दासताम् ॥९॥
तस्मिन् सुवर्णधनदानविधानपुण्य-पण्यैः पुरन्दरपुरीतिलकायमाने।
साम्राज्यमाज्यपरितोषितहव्यवाहो हम्मीरभूपतिर[सृज्यत] भूतधात्रा ॥१०॥
यः कोटिहोमद्वितयं चकार श्रेणी गजानां पुनरानिनाय॥
निर्जित्य येनार्जुनमाजिमुर्न्द्धि श्रीमालवेशं जगृहे हठेन ॥११॥
रणस्तंभपुरे दुर्गे वेश्म पुष्पकसंज्ञकम्।
तिसृभिर्भूमिभिर्युक्तं यः कांचनमचीकरत् ॥१२॥
मथुरापुरीविनिर्गतकायस्थकटारियान्ववायाह्वे।
जाता अनंतसे श्रीधरसंज्ञाः क्रमेण मणयः प्राक् ॥१३॥
लक्ष्मणस्तदनु लक्ष्मणाधिको लक्ष्यलक्षणविलक्षणोऽभवत्।
यश्चलत्कमलकोमलेक्षणो बंधुवत्सल तवेव लक्ष्मणः ॥१४॥
पूर्णपालः स भूपालप्रियोऽस्य तनयोऽभवत्।
यः प्राप यमुनापाल मे बालचरितं शुभम् ॥१५॥
तस्य सूनुरजनिष्ट वरिष्ठो विष्टपि[पे] खलु सोमणसंज्ञः।
देवराजदुहिता परिणीता येन शीलनिधिसोमलदेवी ॥१६॥
तस्य सुतोऽजनि नरपतिनामा भानुकृशानुकनकसमधामा।
यद्गुफणजनितकीर्तिमृदुत्रामा दूरमिर्वति सततमभिरामा ॥१७॥

---

१. मांडूनगर। २. कछवाहाराजा। ३. ....। ४. ....। ५. झंपोइया का घाटा।

तस्यानुजन्मा भवदुग्रकर्मा स श्रीपतिः श्रीपतिसक्तचेताः ।
अन्याङ्गनासोदरताव्रतं यो दधौ सुधासंघमिवामृतांशुः ॥१८॥

श्रीमत्परशुनागाख्यगोत्राब्धेरिंदिरोपमा ।
नवश्रीरिति विख्याता भार्या नरपतेरभूत् ॥१९॥

एकस्मिन्नेव दिवसे स्नात्वा शुद्धसुधाम्बुधौ ।
ताम्रकांस्यादिवस्तूनां ददौ सा दशधां तुलाम् ॥२०॥

वाचस्पतौ सिंहगते गौतम्यां स्नातया यया ।
सुवर्णशृंग्यो विप्रेभ्यो वितीर्णा धेनवः शतम् ॥२१॥

व्यावलाकुंडलाश्चारुनेत्राः भूतिविभूषिताः ।
बभूवुस्तात् सुताः पंच महेश्वरमुखोपमाः ॥२२॥

तेपु ज्येष्ठो(ष्ठः) पद्मसिंहो निरीहो दोषव्यूहेष्वस्ति यत्कीर्तिहंस्या ।
प्रत्यर्थिस्त्रीवक्त्रपात्रान्निपीतं हास्यक्षीरं तद्दृगंतो विमुक्तम् ॥२३॥

यदतिललितरूपं दृष्ट्वा स्मरज्वरतप्तया
सुसरसि तथा स कृत्स्ने कयापि मृगीदृशा ।
तदुदकभरैरुष्णीभूतैर्भृशं परितापितः,
सकलसकुलव्यूहो बाह्ये मृता निपतन् यया ॥२४॥

परिज्ञातसप्ताश्च(श्व) मंत्रैकसारो बभूव द्वितीयश्च धीरूरुदारः ।
प्रियाम्भोजपुंजस्थितिं योऽत्र लक्ष्मी मधा ......हस्तब्जगामेव शुष्मी ॥२५॥
लोलस्त्रितीयस्त्रिपुरापराध्यपादाब्जपूजाधिगतप्रसादः ।
भानूद्भवात्तोयतरंगसंगी हंसाश्रयं विभ्रदसंभ्रमोभूत् ॥२६॥

चतुर्थो भूनाथः स्तुतविविधदेशोद्भवलिपि—
प्रबोधप्रावीण्यः सभजनि स लक्ष्मीधर इति ।
यमाजग्मुर्विद्या युगपदनवि(व)द्या द्विजहितं
शुकादीनां माला बहुफलरसालद्रुमिव ॥२७॥

सत्वरं गत्वरं मत्वा वित्तं वा.........सेवया ।
पात्रसात् कृतसर्वस्वो वदान्यान् व्यसिस्मयत् ॥२८॥

सोमः स पंचमो जीयादपूर्वं यन्मुखाम्बुजम् ।
समस्थितबहिर्लक्ष्मीरंतर्देवि सरस्वती ॥२९॥

अभग्नमानं जडमकलंकं विलोक्य यम् ।
हृदये हर्षमालिन्यमिन्दुर्धत्तेऽङ्ककैतवान् ॥३०॥
पद्मसिंहस्य तनयो मोक्षसिंहः सदा पितुः ।
त्रैमातुरः प्रियं कुर्वन् दीर्घमायुरवाप्नुयात् ॥३१॥
धीरूनाम्नोस्ति तनयो द्वितीयो दीर्घजीवितः ।
तत्रैकः केशवो नाम्ना द्वितीयः सोढसंज्ञकः ॥३२॥
गांगदेवोस्तु गंगाया लब्धो लोलात्मजः सुखी ।
जयसिंहस्तु सोमस्य सूनुःस्तात् सूनृतः प्रियः ॥३३॥
कर्दमालेश्वरस्याग्रे ज्ञानवापीतिनामतः ।
शिलासुबद्धसोपानं कुंडं नरपतिर्व्यधात् ॥३४॥
जैत्रसिंहस्य भूभर्तुः श्रीहम्मीरनृपस्य च ।
नीतिशास्त्रेषु निष्णातो यो लेभे मंत्रिमुख्यताम् ॥३५॥
सहैव वीरस्वामिन्या सप्त(प्ता)श्वकुलदेवताः ।
तत्कुलेनादिपुरुषादारभ्याद्यापि पूज्यते ॥३६॥
रणस्तम्भपुरे दुर्गे देवालयचतुष्टयम् ।
कारयामास वापीं च ग्रामे पिप्पलवाटिके ॥३७॥
सिंहपुर्यां कुरुक्षेत्रे गोदावर्यां क्रमेण यः ।
गवां सहस्रमेकैकं विप्रेभ्यः प्रत्यपादयत् ॥३८॥
श्रीहम्मीरनृवीरस्य पौराणिपदे स्थितः ।
वैजादित्यो नृपामात्यः प्रशस्तिमतनोदिमाम् ॥३९॥
सं० १३४५ वर्षे घटिता सूत्रधार-त्रिविक्रमसुत-राजुकेन ॥

---

57. हनुमत बाड़ी के उत्तर के दरवाजे के पूरब के कोणे पर लगा शिलालेख

श्रीरामो जयति ।

श्रीमन्हारजाधिराज-श्रीसवाईईश्वरीसिंहदेववर्मणां राज्ये रावत-सिभूराम वा रूपराम श्रीहनुमानजीकी बाड़ी प्रतिष्ठा करी उस्ता सबला वा मामचंद मिती ज्येष्ठमासे शुक्लपक्षे पंचमी बुधवासरे । संवत् १८०३ शाके १६६८ ।

(नोट—यह शिलालेख सफेद संगमरमर के १ फुट चौकोरे पर खुदा हुआ है ।)

.. तोरमाण का शिलालेख ।

जगति जलदनीलं ध्वान्तमुत्सारयन् स्वैः किरणनिवहजालैर्व्योमविद्योतधिः(धिः) ।
उदयगिरितटाग्रं मण्डयन् यः सरागैः चकितगमनखेदभ्रान्तचञ्चत्सटान्तै[ः] ॥१॥

उदयगिरि .... ग्रस्त भक्तार्तिहर्त्ता भुवनभवनदीपः शर्वरीनाशहेतुः ।
तपितकनकवर्णैरंशुभिर्पङ्कजान[ा]मभिनवरमणीयं यो विधत्ते स वोऽव्यात् ॥२॥

श्रीतोरमाण इति यः प्रथितो भूपः प्रभूतगुणः ।
सत्यप्रदानसेत्याद्येन मही व्यापत्तासाम्ना ॥३॥
तस्योदितकुलकीर्त्तिः पुत्रोऽतुलविक्रमः पतिःप्र(पृ)थव्याः ।
मिहिरकुलेति ख्यातो यः पशुपतिं परदम .... ॥४॥
राजनि शासति पृथ्वीं पृथुविमललोचनार्तिहरे ।
अभिवर्द्धमानराज्ये पञ्चदशाब्दे नृपवृष(भ)स्य ॥५॥
शशिरश्मिदासविकसितकुमुदोत्पलगन्धशोतलामोदै ।
कार्त्तिकमासे प्राप्ते गगन.......... (नि) मंले भातिः ॥६॥
द्विजगणमुख्यैरभिसंस्तुते त्रिपुण्याहनादघोषेण ।
तिथिनक्षत्रमुहुर्ते सम्प्राप्ते सुप्रशस्तदिने ॥७॥
मातृतुलस्य तु पौत्रः पुत्रश्च तथैव भातृदासस्य ।
नाम्ना च मातृचेटः पव .... वास्तव्यः ॥८॥
नानाधातुविचित्रे सर्पाह्वयनाम्नि भूधरे रम्ये ।
कारितवान् शैलमयं भानोः प्रासादवरमुख्यम् ॥९॥
पुण्याभिवृद्धिहो(हे)तोर्मातापितुस्तथात्मनश्चैव ।
वसता च निजिवरेऽस्मिन् राज्ञः .... पदेन ॥१०॥
ये कारयन्ति भानोश्चान्द्रांशुसमप्रभं गृहप्रवरं ।
तेषां वासः स्वर्गे यावत्कल्पक्षयो भवति ॥११॥
भक्त्या रवेर्विरचितं सद्धर्मव्यापनं सुकीर्तिमयं ।
नाम्ना च केशवेतिप्रथितेन च............त्येन ॥१२॥

यावच्छर्वजटाकलापगहने विद्योतते चन्द्रमा,
दिव्यस्त्रीचरणैर्विभूषिततटो यावच्च मेरुर्नगः ।
यावच्चोरसि नीलनीरदनिभे विष्णुर्बिभर्त्युंज्वलां,
श्रींस्तावद............गिरमूर्धनि .. .. दमुरं व्योरमे ॥१३॥

58. ॥ दूबकुण्ड के कच्छपघातवंश की प्रशस्ति ॥

॥ श्रीगणेशः ॥

ओं नमो वीतरागाय ॥ आ ..... टि....... टनाद्यत्पादपीठंलुठ,
न्मंदारस्त्रगमंदगुंजदलिमन्निष्ठचूतसारांविणम् ।

तत्पाबद्धचः रमु ··· तांसं ·····················
दि ों द्वेगमिवाकरोत् स ऋषभस्वामी श्रिये स्तात् सताम् ।।१।।
बिभ्राणो गुणसंहतिं हततमस्तापो निजज्योतिषा,
युक्तात्मापि जगंति संगतजयश्चक्रे सरागाणि यः।
उन्माद्यन्मकरध्वजोर्जितगजग्रासोल्लसत्केसरी,
संसारोग्रगदच्छिदेस्तु स मम श्रीशान्तिनाथो जिनः ।।२।।
जाड्यं श[ा]श्वतखंडितक्षयमपि क्षोणाखिलोपक्षयं,
साक्षाद्दीक्षितमक्षिभिर्दधिदपि प्रौढं कलंकं तथा ।
चिह्नत्वाद्यदुपान्तमाप्य सततं जातस्तथानंदकृच्—
चन्द्रः सर्वजनस्य पातु विपदश्चन्द्रप्रभोर्हत्स नः ।।३।।
शोकानोकहसंकुलः रतितृणः श्रेणिप्रणश्चद्भ्रम—
····· त्माध्वगपूगमुद्गतंमहामिथ्यात्ववातध्वनिः ।
यो रागादिमृगोपघातकृतधीध्यानाग्निना भस्मासाद्—
भावं कर्मवनं विनाय जयतात् सोऽयं जिनः सन्मति[ः] ।।४।।
प्रसाधितार्थगुर्भव्यपंकजाकरभास्करः ।
अनन्तस्तमोपहो वोस्तु गौतमो मुनिसत्तमः ।।५।।
श्रीमज्जिनाधिपतिसद्वदनारविन्दमुद्गच्छदच्छतरबोधसमृद्धगंधम् ।
अध्यास्य या जगति पंकजवासिनीति ख्यातिं जगाम जयतु श्रुतदेवता सा ।।६।।
आसीत्कच्छपघातवंशतिलकस्त्रैलोक्यनिर्यद्यशः—
पाण्डुश्रीयुवराजसूनुरसमद्युद्भीमसेनानुगः ।
श्रीमानर्जुनभूपतिः पतिरपामप्याय(प)यत्तुल्यतां,
नो गांभीर्यगुणेन निर्जितजगद्धन्वी धनुर्विद्यया ।।७।।
श्रीविद्याधरदेवकार्यनिरतः श्रीराज्यपालं हठात्,
कंठास्थिच्छिदनेकबाणनिवहैर्हत्वा महत्याहवे ।
हिंडीरावलिचन्द्रमण्डलमिलन्मुक्ताकलापोज्ज्वलै—
स्त्रैलोक्यं सकलं यशोभिरचलैर्योऽजस्रमापूरयत् ।।८।।
यस्य प्रस्थानकालोत्थितजलधिरवाकारवादित्रशब्दा—
वेगान्निर्गच्छदद्रिप्रतिमगजघटाकोटिघंटारवाश्च ।
संसर्पन्तः द(अ)हमहमिकया पूरयन्तो विरेमु—
नोराछारंध्रभागं गिरिविवरगुरूद्यत्प्रतिध्वानमिश्राः ।।९।।

दिक्चक्राक्रमयोग्यमार्गणगणाधारानन्नेकान् गुणा—
नच्छिन्नाननिशं दधद्विधुकलासंस्पर्द्धमानद्युतीन् ।
सूनुच्छिन्नधनुर्गुणं विजयिनोऽप्याजौ विजित्योर्जितं,
जातोऽस्मादभिमन्युरन्यनृपतीनामन्यमानस्तृणम् ॥१०॥
यस्यात्यद्भुतवाहवाहनमहाशस्त्रप्रयोगादिषु,
प्रावीण्यं प्रविकत्थितं पृथुमति श्रीभोजपृथ्वीभुजा ।
छत्रालोकनमात्रजातभयतो दृप्तारिभङ्गप्रद—
स्यास्य स्याद् गुणवर्णने त्रिभुवने को लब्धवर्गः प्रभुः ॥११॥
तुरगखरखुराग्रोत्खातधात्रीसमुत्थं,
स्थगयदहिमरश्मेर्मण्डलं यत्प्रयाणे ।
प्रचुरतररजोऽन्याशेषतेजस्वितेजो-
हृतिमविरत ...स वाशंसती वा निवारम् ॥१२॥
शरदमृतमयूखप्रेंखदंशप्रकाश—
प्रसरदमितकीर्तिव्याप्तदिक्चक्रवालः ।
अजनि विजयपालः श्रीमतोऽस्मान् महीशः,
शमितशकलधात्रीमंडलक्लेशलेशः ॥१३॥
भयं यच्छत्रूणां त्रिदशतरणीवीक्षितरणे,
क्रमेणाशेषाणां व्यतरदसदप्यात्मनि सदा ।
सतोप्यंशन्नादादवनिवलयस्याधिकमतो-
बुधानामाश्चर्यं व्यतनुत नरेन्द्रो हृदि च यः ॥१४॥
तस्माद्विक्रमकारिविक्रमभरप्रारंभनिर्मेदित-
प्रोत्तुङ्गाखिलवैरिवारणघटोद्यन्मांसकुंभस्थलः ।
श्रीमान् विक्रमसिंहभूपतिरभूदन्वर्थनामा समं—
सर्वाशाप्रसरद्विभासुरयशःस्फारस्फुरत्केसरः ॥१५॥
बालस्यापि विलोक्य यस्य परिधाकारं भुजं दक्षिणं,
क्षीणाशेषपराश्रयस्थितिधिया वीरश्रिया संश्रितम् ।
सर्वांगेष्ववगूहनाग्रहमहंकारादहंपूर्विका,
राज्यश्रीरकृताधिकस्य विमुखी सर्वान्यपुंवर्गतः ॥१६॥
अत्यंतोद्दप्तविद्विट्तिमिरभरविदिच्छादिता नीतितारा,
चक्रे विष्वक्प्रकाशं सकलजगदमंदावकाशं दधाने ।

निःपर्यायं दिगास्यप्रसरदुरुकराक्रान्तधात्री धरेन्द्रे,
यस्मिन् राजांशुमालिन्यहह सति वृथैवैशकोन्योंऽशुमाली ॥१७॥

यद्दिग्जये वरतुरंगखुराग्रसंगः क्षुण्णावनीवलयजन्यरजोभिसर्पत ।
विद्वेषिणां पुरवरेषु तिरोहितान्यवस्तूत्करं प्रलयकालमिवादिदेश ॥१८॥

तस्य क्षितीश्वरवरस्य पुरं समस्ति विस्तीर्णशोभमभितोऽपि चडोभसंज्ञम् ।
प्राप्तेप्सितक्रयसमग्रदिगागतांगिव्यावर्ण्यमानविपणिव्यवहारसारम् ॥१६॥

आसीज्जायसपूर्वनिर्गतवणिग्वंशांबराभांशुमान्,
जासूकः प्रकटाक्षतार्थनिकरः श्रेष्ठी प्रभाधिष्ठितः ।
सम्यग्दृष्टिरभीष्टजैनचरणद्वन्दार्चने यौ(यो)ददौ,
पात्रौघाय चतुर्विधं त्रिविबुधो दानं युतः श्रद्धया ॥२०॥

श्रीमज्जिनेश्वरपदाम्बुरुहद्विरोफो (रेफो) विस्फारकीर्तिधवलीकृतदिग्विभागः ।
पुत्रोऽस्य वैभवपदं जयदेवनामा सीमायमानचरितोऽजनि सज्जनानाम् ॥२१॥

रूपेण शोलेन कुलेन सर्वस्त्रीणां गुणैरप्यपरैः शिरस्सु ।
पदं दधानाय वभूव भार्या यशोमतीति प्रथिता पृथिव्याम् ॥२२॥

तस्यामजीजनदसावृषिदाहड़ाख्यौ पुत्रौ पवित्रवसुराजितचारुमूर्ती ।
प्राच्यामिवार्कशशिनौ समयः समस्त-सम्पत्-प्रसाधक-जनव्यवहारहेतू ॥२३॥

प्रोन्माद्यत्सकलारिकुंजरशिरोनिर्दारणोद्यद्यशो-
मुक्ताभूषितभूरभूरपिभियान्नोन्मार्गगामी च यः ।
सोऽदाद्विक्रमसिंहभूपतिरतिप्रीतो यकाभ्यां युग—
श्रेष्ठः श्रेष्ठिपदं पुरेऽत्र परमे प्राकारसौधापणे ॥२४॥

आसीद् विशुद्धतरबोधचरित्रदृष्टिर्निः शेषसूरिनतमस्तकधारिताज्ञः ।
श्रीलाट-वागट-गणोन्नत-रोहणाद्रि-माणिक्य-भूतचरितो गुरुदेवसेवः ॥२५॥

सिद्धान्तो द्विविधोप्यवाधिततया येन प्रमाणाध्वनि,
ग्रन्थेषु प्रभवः श्रियामवगतो हस्तस्य मुक्तोपमः ।
जातः श्रीकुलभूषणोऽखिलवियद्वासोगणग्रामणीः,
सम्यग्दर्शनशुद्धबोधचरणालंकारधारी ततः ॥२६॥

रत्नत्रयाऽऽभरणधारणजातशोभस्तस्माद [भूत्]स दुर्लभसेनसूरिः ।
सर्वश्रुतं समधिगम्य सहैव सम्यगात्मस्वरूपनिरतो भवदिद्धधीर्यः ॥२७॥

आस्थानाधिपतौ बुधादविगुणे श्रीभोजदेवे नृपे,
सभ्येष्वंबरसेनपंडितशिरोरत्नादिषूद्यन्मदान् ।
योऽनेकान् शतशो व्यजेष्ट पटुतोभीष्टोद्यमो वादिनः,
शास्त्राम्भोनिधिपारगोऽभवदतः श्रीशान्तिषेणो गुरुः ॥२८॥

गुरुचरणसरोजाराधनावाप्तपुण्यप्रभवदमलबुद्धिः शुद्धरत्नत्रयोऽस्मात् ।
अजनि विजयकीर्तिः सूक्तरत्नावकीर्णां जलधिभुवमिवैतां [यः] प्रशस्तिं व्यधत (त्त) ॥२९॥

तस्मादवाप्य परमागसारभूतं धर्मोपदेशमधिकाधिगतप्रबोधाः ।
लक्ष्म्याश्च वंधुसुहृदां च समागमस्य मत्वायुषश्च वपुषश्च विनि(न)श्वरत्वम् ॥३०॥

प्रारब्धाधर्मकान्तारविदाहः साधुदाहड़ः ।
सद्विवेकश्च कूकेकः सूर्पटः सुकृते पटुः ॥३१॥

तथा देवधरः शुद्धः धर्मकर्मधुरन्धरः ।
चन्द्रालिखितनाकश्च महीचन्द्रः शुभार्जनात् ॥३२॥

गुणिनः क्षणनाशि-श्री-कला-दान-विचक्षणाः ।
अन्येऽपि श्रावकाः केचिदकृतेन्धनपावकाः ॥३३॥

किंच लक्षणसंज्ञोभूद् हृदेवस्य मातुलः ।
गोष्ठिको जिनभक्तश्च सर्वशास्त्रवि वक्षणः ॥३४॥

शृंगाग्रोल्लिखितांबरं वरसुधा सान्द्रं द[दि]वापांडुरं,
सार्थं श्रीजिनमन्दिरं त्रिजगदानन्दप्रदं सुन्दरम् ।
संभूषेदमकारयन् गुरुशिरःसंचारिकेत्वंबर—
प्रान्तेनोच्छलतेव वायुविहितेर्धामादित[ः] पश्यतांम् ॥३५॥

अथैतस्य जिनेश्वरमंदिरस्य निष्पादनपूजन-संस्कारार्थाय कालान्तर-स्फुटितत्रुटित प्रतीकारार्थं च महाराजाधिराजश्रीविक्रमसिंहः स्वपुण्यराशेरप्रतिहतप्रसरं परमोपचयं चेतसि निधाय गोणीं प्रति विंशोपकं गोधूमगोणी चतुष्टयं वापयोग्यक्षेत्रञ्च महाचक्रग्रामभूमौ रजक-द्रहपूर्वदिग्भागवाटिका-वापी-समन्विता प्रदीपमुनिजनशरीराभ्यञ्जनार्थं करघटिकाद्वयञ्च दत्तवान् तच्चाचन्द्रार्कं महाराजाधिराजश्रीविक्रमसिंह[ो] परोधेन

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

इति स्मृतिवचनान्निजमपि श्रेयःप्रयोजनं मन्यमानैः सकलैरपि भाविभि र्भूमिपालैः प्रतिपालनीयमिति ॥०॥

लिलिखोदयराजो यां प्रशस्ति शुद्धधीरिमाम् ।
उत्कीर्णवान् शिलाकूटस्तील्हणस्तां सदक्षराम् ।।
सं० ११४५ भाद्रपद सुदि ३ सोमदिने । मंगलं महा श्रीः ।।

59. नरवर के कच्छपघातवंश की प्रशस्ति ।

श्रोम नमो नारायणाय । संवत् ११७७ कार्तिक वदि अमावस्यायां रविदिनेऽद्येह श्रीमन्नवलपुरमहादुर्गे परमवैष्णवः परमब्रह्मण्यो दीनानाथः कृपणजनवत्सलोऽनेक-गुणगणालङ्कृतशरीरः पितृमातृपादाम्बुजसुग्रहणपरी युधिष्ठिरवत् सत्यवादी भीमसेन इवात्यद्भुतवीर्योऽर्जुन इव धनुर्धराग्रेसरः कर्ण इव त्यागी जितकीर्तिः दुर्योधन इव महामानी मृगेन्द्र इवाऽप्रतिमपराक्रमः समरवसुधावतीर्णदुर्वारवैरिवारणघटासंघट्टविघट्टनोपार्जितयशः-सुधाधवलिताखिलमहीमंडलः श्रीमत्कच्छपघातान्वयसरःकमलमार्त्तण्डो महाराजाधिराज-परमेश्वरश्रीशारदसिंहदेवपादध्यानानुध्यानपरः परमराज्ञीश्रीलखमादेवीगर्भरत्नाकरोत्पन्न-माणिक्यमूर्त्तिः परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवीरसिंहदेवो विजयी उपरि सूचितग्रामे ब्राह्मणोत्तरान् बलिराजमहन्तप्रमुखसमस्तजनपदान् यथार्हं प्रतिमान्य सम्बोधयति समाज्ञापयति च ।

विदितमस्तु भवतां यथानामतः प्रसिद्धो बवाड़ीग्रामः समस्तनिजमेखलावलय पर्यंतः सवनवृक्षमालाकुलः साभ्रमधुकाराम्रसमस्ततृणकाष्टाटवीयुक्त आकाशपातालीयो-त्पत्तिसमुपेतो महादण्डदौहृद(द्द)शापराधवर्जितः प्रतिषिद्धचौरपुरप्रवेशोऽष्टादशप्रबलसमन्वितो यथाभागभोगकरहिरण्यादिप्रवेशः चतुराघाटविशुद्धः श्रद्धया पुण्येहऽनि मनोनुध्यातगंगादि-महानदीजले हिरण्यदर्भोदकस्पर्शपूर्वकं विधिवत् पित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृ-द्धयेऽस्माभिः प्रतीतः काश्यपगोत्रायाऽऽवसथिक गोविन्दाय पदे २ भ्रातृपद्मनाभाय पदं १ केशवाय पदं १ उपमन्युगोत्राय चतुर्वेदीरामाय पदं १ केशवाय पदं १ नारसिंहाय पदं १ लखमणाय पदं १ भारद्वाजगोत्राय सठे पदं १ काश्यपगोत्राय पदं० ।। केशवाय पदं० ।। कृष्णात्रेयगोत्राय पंछी हिलाय पदं १ काश्यपगोत्राय पं० गोपतिपदं १ अत्रिगोत्राय महसोणपदं भार्गवगोत्राय शीले पदं १ कृष्णा त्रेयगोत्राय नाबूपदं १ भारद्वाजगोत्राय माल्यपदं १ कपिष्ठलगोत्राय चामरपदं १ गोतमगोत्राय आप पदं १ प्रदत्तः स च भवद्भिरनुमंतव्य अनुपालनीयश्च ।

यानि च भूदानप्रशंसावाक्यानि व्यासादिभिः प्रणीतानि तानि भवद्भिः श्रुतान्येव यथा—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ।।१।।

सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटक-क्षिति-गोप्तृणां सप्तजन्मानुगं फलम् ॥२॥
हलकृष्टां महीं दद्यात् सबीजां शस्यशालिनीम् ।
यावत् सर्पभृतान् लोकान् तावत् स्वर्गे महीयते ॥३॥
भूमिं यः प्रतिगृह्णाति यस्तु भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥४॥
समाःशतसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमंता च तान्ये(स ए)व नरकं व्रजेत् ॥५॥
यागानां च सहस्रेण अश्वमेधशतेन च ।
गवां शतसहस्रेण भूमिहर्त्ता न शुद्ध्यति ॥६॥
अस्मद्वंशे परिक्षीणे परवंश्योऽपि यो भवेत् ।
तस्याहं पादयोर्लग्नो मद्दत्तं पालयत्विति ॥७॥

लिखितमिदं ग्रामशासनं ठाकुरअर्जुनसुतेन पंडितसलखकेन। यस्मिन् न्यूनाक्षरमधिकाक्षरं वा तत् सर्वं प्रमाणमिति ।

महाराजाधिराजश्रीमद्वीरसिंहस्य विजयिनः स्वहस्तः ॥

60. पद्मनाथदेवालयस्य प्रशस्तिशतकम् ॥

ओं नमः पद्मनाथाय ॥

हर्षोत्फुल्लविलोचनैर्दिशि दिशि प्रोद्गीयमानं जनै-
र्मेदिन्यां विततन्ततो हरिहरब्रह्मास्पदानि क्रमात् ।
श्वेतीकृत्य यदात्मना परिणतं श्रीपद्मभूभृद्यशः,
पायादेष जगन्ति निर्मलवपुः श्वेतानिरुद्धश्चिरम् ॥१॥
मौलिन्यस्तमहानीलशकलः पातु वो हरिः
दर्शयन्निवकेशस्थनवजीमूतकर्णिकाम् ॥२॥
मुक्ताशैलच्छलेन क्षितितिलकयशोराशिना निर्मितोऽयं,
देवः पायादुषायाः पतिरतिधवलस्वच्छकान्तिर्जगन्ति ।
मन्वानः सर्वथैव त्रिभुवनविदितं श्यामतापह्नवं यः,
शङ्के स्वं वर्णचिह्नं मुकुटतटमिलन्नीलकान्त्या बिभर्त्ति ॥३॥
इदं मौलिन्यस्तं न भवति महानीलशकलं,
न मुक्ताशैलेन स्फुरति घटितश्चैष भगवान् ।

उषाकर्णोत्तंसीकरणसुभगं नीलनलिनं,
वहत्यद्याप्यस्याश्चिरविरहपाण्डूकृततनुः ॥४॥
आसीद्वीर्यलघूकृतेन्द्रतनयो निःशेषभूवि (मी) भृतां,
वन्द्यः कच्छपघातवंशतिलकः क्षोणीपतिलक्ष्मणः ।
यः कोदण्डधरः प्रजाहितकरश्चक्रे स्वचितानुगा-
ङ्गामेकः पृथुवत्पृथूनपि हठादुत्पाट्य पृथ्वीभृतः ॥५॥
तस्माद्वज्रधरोपमः क्षितिपति. श्रीवज्रदामाभवद्,
दुर्वारोर्जितबाहुदण्डविजिते गोपाद्रिदुर्गे युधा ।
निर्व्याजम्परिभूय गाधिनगराधीशप्रतापोदयं,
यद्वीरव्रतपूरकः समचरत्प्रोद्घोषणाडिण्डिमः ॥६॥
न तुलितः किल केनचिदप्यहं जगति भूमिभृतेति कुतूहलात् ।
तुलयति स्म तुलापुरुषैः स्वयं स्वमिह यः सुविशुद्धहिरण्मयैः ॥७॥
ततो रिपुध्वान्तसहस्रधामा नृपोऽभवन्मंगलराजनामा
य ईश्वरैकप्रणतिप्रभावान्महेश्वराणाम्प्रणतः सहस्रैः ॥८॥
श्रीकीर्तिराजो नृपतिस्ततोभूद्यस्य प्रयाणेषु चमूसमुत्थैः ।
धूलीवितानैः सममेव चित्रं मित्रस्य वैवर्ण्यमभूद्द्विषश्च ॥९॥
किं ब्रूमोऽस्य कथाद्भुतं नरपतेरेतेन शौर्याब्धिना,
दण्डो मालवभूमिपस्य समरे संख्यामतीतो जितः ।
यस्मिन् भङ्गमुपागते दिशि दिशि त्रासात्कराग्रच्युतै—
र्ग्रामीणाः स्वगृहाणि कुन्तनिकरैः संच्छादयाञ्चक्रिरे ॥१०॥
अद्भुतः सिंहपानीयनगरे येन कारितः ।
कीर्तिस्तम्भ इवाभाति प्रासादः पार्वतीपतेः ॥११॥

तस्मादजायत महामतिमूलदेवः पृथ्वीपतिर्भुवनपाल इति प्रसिद्धः ।
आनन्दयञ्जगदनिन्दितचक्रवर्त्तिः श्चिह्नै रलङ्कृततनुर्मनुतुल्यकीर्त्तिः ॥१२॥
यस्य ध्वस्तान्यभूपालां सर्वां पालयतः प्रभोः ।
भुवं त्रैलोक्यमल्लस्य निःसपत्नमभूज्जगत् ॥१३॥
राज्ञी देवव्रता तस्य हरेर्लक्ष्मीरिवाभवत् ।
तस्यां श्रीदेवपालोऽभूत्तनयस्तस्य भूपतेः ॥१४॥

त्यागेन कर्णमजयत् पार्थं कोदण्डविद्यया ।
धर्मराजं च सत्येन स युवा विनयाश्रयः ॥१५॥
सूनुस्तस्य विशुद्धबुद्धिविभवः पुण्यैः प्रजानामभू—
मान्धातेव स चक्रवर्त्तितिलकः श्रीपद्मपालः प्रभुः ।
मत्स्वाम्येऽपि करप्रवृत्तिरपरस्येतीव यश्चिन्तयन्,
दिग्यात्रासु मुहुः खरांशुमरुणत्सान्द्रैश्चमूरेणुभिः ॥१६॥
कृत्वान्याः स्ववशे दिशः क्रमवशादाशाङ्गतैर्दक्षिणा—
मुत्क्षिप्ताचलसन्निभानविरतं यत्सैन्यवाजिव्रजैः ।
उद्धूतान्पततः पयोधिमभितः संप्रेक्ष्य रेणूत्करान्,
भूयोऽप्युद्भटसेतुबन्धनधिया त्रस्यन्ति नक्तञ्चराः ॥१७॥
यस्येन्दुद्युतिडम्बरेण यशसा नीते सुराणाङ्गणे
वैवर्ण्यं भ्रमशीलखण्डनभयादप्राप्नुवन्तः प्रियान् ।
नूनं शक्रपुरःसरामरवधूसंघाः श्रिये साम्प्रतं,
गौर्यै च स्पृहयन्ति ये प्रथमतः पत्युर्वपुःसंश्रिते ॥१८॥
कैर्दृष्टाः क्व समस्तवाञ्छितफलभ्राजिष्णवः पादपा—
गावः कामदुघाः क्व कैः क्व मणयः कैश्चिन्तितार्थप्रदाः ।
दृष्टाः कस्य मनोरथा इह न कैः पत्यामुना पूरिता—
वीरोद्यानतटस्य तद्गुणवतः कल्पद्रुमादीन्यपि ॥१९॥
श्रुत्वा न पद्मनृपतिं परिरक्षिता भूः प्राप्तोऽन्यथापि यदसौ बत नग्नभावः ।
दौस्थ्यान्निरम्बरतनुर्विपिनेष्वशोचद्यस्मात्प्रतिक्षणमिति प्रतिपंथिसार्थः ॥२०॥
भ्रमः कुलालचक्रेषु लोभः पुण्यार्जनेष्वभूत् ।
काठिन्यं कुचकुंभेषु तस्मिञ्शासति मेदिनीम् ॥२१॥
असम्मतोद्दृढगुणस्य पीडा साधुर्न निस्त्रिंशपरिज्ञतापि ।
इत्याललम्बे न धनुर्न चासिं तथापि यो वैरिगणं जिगाय ॥२२॥
सद्यःश्रुतास्रपृषतव्यतिकीर्णरूपो वैरिद्विषाधिपशिरोमणिभिः समन्तात्
लोकानुरागयशसामिव बीजवापं विस्तारयां यदसिरास रणाजिरेषु ॥२३॥
वने यदरिनारीणां हैमनीरजनिश्चयः
भृङ्गाणां तन्मुखेनातो हैमनीरजनिश्चयः ॥२४॥
स विमृष्य नदीपूरगत्वरे संपदायुषी ।
पूर्त्तधर्मे मतिञ्चक्रे जिघृक्षुरनयोः फलम् ॥२५॥

प्रजाभर्त्रा तेन क्षितितिलकभूतेन भवनं,
हरेर्धर्मज्ञेन त्रिदशसदृशा कारितमदः ।
वदाम्यस्योच्चैस्त्वं कथमिव गिरा यस्य शिखरं,
समारूढः सिंहो मृगमिव मृगाङ्कस्थमशितुम् ॥२६॥
प्रासादस्यास्य शश्वद्विधुधरशिखरिस्पर्धिनो हैममण्ड-
दण्डाग्रात्पावनीयं शशधरधवला वैजयन्ती पतन्ती ।
निर्वातम्भाति भूतिच्छुरितनिजतनोर्देवदेवस्य शंभोः,
स्वर्गाद्गङ्गेव पिङ्गस्फुट[वि] कट- जटाजूटमध्यं विशन्ती ॥२७॥
तदेतद्ब्रह्माण्डं स इह भविता पङ्कजभवः,
पुनर्यं वोढास्मो वयमिह विमानेन वियति ।
सुवर्णाण्डं हंसास्तदिदमुररीकृत्य सहसा,
ध्रुवं संसेवन्ते हरिसदनमुच्चैः स्थितममी ॥२८॥
तुङ्गिम्ना कनकाचलः शुभविधावन्तस्थितः श्रीपति—
विभ्राणो द्विजसत्तमानुदधिजावासो नृसिंहान्वितः ।
निर्मातास्य वृतः समस्तविबुधैर्लब्धप्रतिष्ठैरयं
प्रासादश्च धरातले सममहो कल्पं हरेः कल्पताम् ॥२९॥
देवेर्द्धसिद्धे द्विजपुङ्गवेषु प्रतिष्ठितेष्वष्टसु पद्मपालः ।
युवैव दैवप्रतिकूलभावात् संक्रन्दनाङ्कासनभाग्बभूव ॥३०॥
तस्य भ्राता नृपतिरभवत् सूर्यपालस्य सूनुः,
श्रीगोपाद्रौ सुकृतनिलयः श्रीमहीपालदेवः ।
यम्प्राप्यैव प्रथितयशसं तावभूतां सनाथौ,
शौर्यत्यागौ हरिरविसुताभावदुःस्थौ चिरेण ॥३१॥
सृष्टिं कुर्वन्नमात्यानां विप्राणां स नृपः स्थितिम् ।
प्रलयं विद्विषामासीद् ब्रह्मोपेन्द्रहरात्मकः ॥३२॥
यत्र धामनिधौ राज्ञि पालयत्यवनीतलम् ।
न भास्वान् भास्करादन्यो न राजान्यो विधोरभूत् ॥३३॥
कृताभिषेकं सद्वृत्तैरुपविष्टं नृपासने ।
यमुदारपदैरेवं तुष्टुवुः सूतगायना ॥३४॥
त्वामुदहन्ति शिरसा खलु राजहंसाः,
सृष्टास्त्वया पुनरिमा समयावसन्नाः ।

नाथ प्रजाः सुमनसां प्रथमोऽसि कोऽसि,
त्वं सिद्धवीररसतामरसोद्भवस्य ॥३५॥
लक्ष्मीपतिस्त्वमसि पङ्कजचक्रचिह्नं,
पाणिद्वयं वहसि भूप भुवं विभर्षि ।
श्यामं वपुः प्रथयसि स्थितिहेतुरेक—
स्त्वं कोऽसि नीतिविजितोद्भव माधवस्य ॥३६॥
त्वं पालयस्यनिशमर्थिजनस्य कामं,
रामः श्रिया त्वमसिनाथ गुणैरनन्तः ।
सङ्कर्षणः समिति विद्विषदायुषस्त्वं,
त्वं कोऽसि सच्चरितहाल हलायुधस्य ॥३७॥
ख्याता रतिस्तव निजप्रमदासु नित्यं,
रूपं तवातिशयविस्मयकारि देव ।
त्वं मीनचिह्नपुरुषोत्तमसंभवोऽसि,
कस्त्वं क्षितिशवरशंत्ररसूदनस्य ॥३८॥
भूभृत्सुतापतिरसि द्विषता पुराणा,
भेत्ता त्वमीश वृषपोषरतोऽसि नित्यम् ।
भूतिं दधास्यमलचन्द्रविभूषिताङ्गः,
कस्त्वं सदम्वुजविभाकर शङ्करस्य ॥३९॥
त्वं तेजसा शिखिनमिद्धमधःकरोषि,
शक्ति दधासि नरदेवविपन्निहन्त्रीम् ।
त्वं तारकं रिपुबलस्य बलान्निहंसि
कस्त्वं नवीननलनीलगलध्वजस्य ॥४०॥
त्वं वज्रभृत्त्वमसि पक्षभिदप्यशेष—
भूमीभृतां विबुधवंद्यगुरुप्रियोसि ।
श्रीकम्बुवर्ण गिरिदुर्गचणोऽसि कोऽसि,
त्वं भीमसाहस सहस्रविलोचनस्य ॥४१॥
ख्यातं तवेश बहुपुण्यजनाधिपत्वं,
कान्तालकावलिभिराप्ततमैच गुप्ता ।
त्वामामनन्ति परमेश्वरबद्धसख्यं
त्वङ्कोऽसि सद्गुणनिधानधनाधिपस्य ॥४२॥

तेजोनिधिस्त्वमसि भूमिभृतः समग्राः,
क्रान्ता[ः] करैः प्रसभमुग्रतरैस्तवेश ।
प्राप्तोदयः सततमर्थिजनस्य कोऽसि,
त्वं कल्पभूरुह सरोरुहबान्धवस्य ।।४३।।
आनन्ददोसि जनतानयनोत्पलाना-
माप्यायिताखिलजनः करमार्दवेन ।
त्वं शश्वदीश्वरशिरस्तलदत्तपाद-
स्त्वं कोऽसि मर्त्यभुवनेश निशाकरस्य ।।४४।।
त्वामंशमीश निगदन्ति मधुद्विषोमी,
श्यामाभिरामतनुरस्यमलप्रबोधः ।
पुण्यश्च भारतमिदं विहितं त्वयैव,
त्वं कोऽसि सत्यधन सत्यवतीसुतस्य ।।४५।।
नीतात्मकीर्तिसुरसिंधुरियं समुद्र-
प्रान्तान्त्वयोन्नतिमसौ गमितः स्ववंशः ।
पूर्वे पवित्रतनवो विहिताश्च कोऽसि,
त्वं सत्सु लब्धपरभागभगीरथस्य ।।४६।।
एतत्त्वया कृतमताडकमासु विश्वं,
व्याप्ता मही हरिभिरीश मनोजवैस्ते ।
पुण्यावतारकरणक्षतदुर्दशास्य-
स्त्वं कोऽसि दत्तरिपुलाघव राघवस्य ।।४७।।
धर्मप्रसूस्त्वमसि सत्यधनस्त्वमेक—
स्त्वं वासुदेवचरणार्चनदत्तचित्तः ।
त्वं कोऽसि विप्रजनसेवितशेषवृत्तिः,
सङ्ग्रामनिष्ठुर युधिष्ठिरपार्थिवस्य ।।४८।।
त्वं भूरिकुंजरबलो भुवनैकमल्लो,
विद्याविभूषिततनुर्नृप पावनोऽसि ।
प्रच्छन्नसूपकृतिसंभृतबंधुवाञ्छः,
कस्त्वं कवीन्द्रकृतमोद वृकोदरस्य ।।४९।।

एकस्त्वमीश भुविधर्मभृतां वरिष्ठः,
स स्वामिकारिगणदर्पहरस्त्वमाजौ ।
गंधर्वराजपृतनाविजयाप्तकीर्ति-
स्त्वं कोऽसि सुन्दर पुरन्दरनन्दनस्य ।।५०।।
दुर्योधनारिबलदर्पहृतस्तवेश,
यत्नः परार्जुनयशः प्रसरं निरोद्धुम् ।
त्वं कोऽसि सूर्यजनितप्रमदार्थिसार्थ-
दौर्गत्यकर्तन विकर्त्तनसंभवस्य ।।५१।।
रत्नालयस्त्वमसि धामगभीरताया-
स्त्वं पासि पार्थसमभूमिभृतः प्रविष्टान् ।
अन्तःस्थितस्तव हरिः सततं नरेश,
कस्त्वं वितीर्णरिपुजागरसागरस्य ।।५२।।
शौर्यैकभूः क्रमसमागतसत्त्ववृत्ति-
स्त्वं राजकुञ्जरशिरःप्रवितीर्णपादः ।
दृप्तारिभास्करतिरस्कृतिसिंहिकाभूः,
कस्त्वं महीपतिमृगाङ्क मृगाधिपस्य ।।५३।।
दानं ददासि विकटोन्नतवंशशोभ-
स्त्वं दन्तपालिकरवालहृतारिदर्पः ।
क्षोणीभृतो जयसि तुङ्गतया नरेन्द्र,
त्वं कोऽसि वैरिबलवारण वारणस्य ।।५४।।
सद्यःश्रियस्त्वमसि मित्रकृतप्रमोद-
स्त्वं राजहंससमलंकृतपादमूलः ।
स्वामिन्नधःकृतजडोऽसि गुणाभिरामः,
कस्त्वं स्मिताढ्यमुखपङ्कज पङ्कजस्य ।।५५।।
सत्पत्रभूषिततनुः सुविशुद्धकोश-
स्त्वं चन्द्रकान्तिसमलङ्कृतकान्तमूर्तिः ।
ख्यातं तवैव कविवल्लभ सौमनस्यं,
त्वं ब्रूहि कः समरभैरव कैरवस्य ।।५६।।
त्वं पश्यतां हरसि देव मनांसि शश्वन्-
माङ्गल्यभूस्त्वमसि निर्मलताभिरामः ।

कोऽसि प्रसीद वद सद्गुणरत्नयोनि-
स्त्वं कच्छपारिकुलभूषण भूषणस्य ।।५७।।
धात्रा परोपकरणाय विसृष्टकाय,
सच्छाय जन्मसमलंकृततुङ्गगोत्र !
ब्रूहि त्रिसन्ध्यमवनीश्वरवन्दनीय,
त्वङ्कोसि सूर्यनृपनन्दन चन्दनस्य ।।५८।।
नाधःकृतद्विजपतिर्न मदान्वितोऽसि,
न त्वं विशुद्धहृदय प्रथितोऽग्रमायः ।
त्वं जातु न क्षतवृषो न जडे कृतास्थ-
स्तेनास्तु नाथ हरिणोपमितिः कथं ते ।।५९।।
नित्यं सन्निहितक्षयः स तमसा प्रायोऽभिभूयेत स
त्वत्त्रासाद्भुवनैकनाथ हरिणस्तस्योदरे प्राविशत् ।
मूर्तिस्तस्य कलङ्किता स जडतां धत्ते स दोषाकरः,
शब्दस्ते विदितस्तथापि नृपते राजात्वमित्यद्भुतम् ।।६०।।
एकेनोत्तरगोगृहे विमुखतां पार्थेन नीताः परे,
व्यासेन स्तुतिरर्जुनस्य विहितेत्यज्ञायि पूर्वं किल ।
तत्सम्यक् प्रतिभाति सम्प्रति पुनः श्रीमन्महीपालन-
स्त्वामालोक्य सहस्रशो रिपुबलं निघ्नन्तमेकं रणे ।।६१।।
किं ब्रूमोऽधिकतत्वमीश भवतस्त्वं नीतिपात्रं परं,
वृत्तान्तं जगतीपते चतसृणामात्मप्रियाणां शृणु ।
कीर्तिर्भ्राम्यति दिक्षु गीर्गुणवतां कण्ठे लुठत्यादृता ।
मर्यादारहिता महीद्विजसुहृद्गेहे रता श्रीरपि ।।६२।।
किं चित्रं भुवनैकमल्ल यदियं मन्दाकिनीपद्मभू-
लोकादुद्धरता भगीरथनृपेणानायि निम्नां महीम् ।
आश्चर्यम्पुनरेतदीश यदितो निम्नान्महीमण्डला-
दूर्ध्वं कीर्त्तितरङ्गिणी कमलभूलोकं त्वया प्रापिता ।।६३।।
चित्रं नात्र स लक्षशस्त्वमकरोः सर्वात्मना विद्विषो-
देवप्रत्ययलोपमाशु विशिखैः संमूर्च्छितस्याहवे ।

क्रोधाद्भैरवमूर्तिरुल्लसदसिक्रूरप्रहाराद्भुतं-
रस्य त्वं यदनीनशः प्रकृतिमप्येतन्न नाश्चर्यकृत् ।।६४।।
अत्यम्बुधि भवद्धैर्यमत्यादित्यं भवन्महः ।
अतिसिंहं भवच्छौर्यमतः केनोपमीयसे ।।६५।।
केयूरं तव भूपाल भुजदण्डे विराजते ।
किरीटमिव बाह्वन्तर्निवासि विजयश्रियः ।।६६।।
यदर्चां संतत्य त्रिभुवनगुरोः स्तोत्रमकृथा-
स्तदेष प्रीतस्त्वां ध्रुवमकृत कल्पस्थितिमिह ।
यदुत्सङ्गे तुङ्गे धवलरविचन्द्रांशुविमला,
प्रलम्बव्याजेन क्षितितिलकतारावलिरियम् ।।६७।।
वैतालिकैरित्थमभिष्टुतेन सम्पूजिता मर्त्यगुरुद्विजेन ।
विमुक्तकारागृहसंयतेन वितीर्णभूताभयदक्षिणेन ।।६८।।
तेनाभिषिक्तमात्रेण प्रतिजज्ञे द्वयं स्वयम् ।
पद्मनाथस्य संसिद्धिः कन्यायाः सद्वरार्पणम् ।।६९।।
तच्च द्वयं कृतमनेन विवेकभाजा राजात्मजा मदनहारिवराय दत्ता ।
श्रीपद्मनाथसुरमन्दिरमेतदुच्चैर्नीतं समाप्तिमविनाशि यशश्शरीरम् ।।७०।।
समर्पिता ब्रह्मपुरी च तेन शेषाम्विधायावनिदेवमुख्यान् ।
प्रवर्तितं सत्रमतन्द्रितेन मिष्टान्नपानैरतिधार्मिकेण ।।७१।।
श्रीपद्मनाथस्य स लोकनाथश्चक्रे द्वयं भूपतिचक्रवर्त्ती ।
नैवेद्यपाकाय विपक्वबुद्धिः प्रादात्प्रदीपाय च गोत्रदीपः ।।७२।।
ब्रह्मोत्तरं मण्डपिकासमुत्थं द्विधा विधाय स्वयमीश्वरेण ।
श्रीपद्मनाथाय वितीर्णमर्द्धमर्द्धश्च वैकुण्ठसुरेश्वराय ।।७३।।
विलासिनीवादकगायनादेर्यथार्हतः पादकुलस्य वृत्तिम् ।
स पद्मनाथस्य पुरः समग्रामकल्पयत् प्रेक्षणकायभूपः ।।७४।।
पाषाणपल्लीं प्रविभज्य सम्यग् देवाय सार्द्धानि पदानि पञ्च ।
सम्पादयामास तथा द्विजेभ्यः सार्द्धाश्चतुर्विंशतिमुत्तमेभ्यः ।।७५।।
ददौ करस्कन्धकपाटपीठं महीपतिस्तत्रभवं समस्तम् ।
आकाशपातालसमुद्गतं च देवद्विजेभ्यो लवणाकरं च ।।७६।।
तस्यादृष्टसहायतामुपगतो योगेश्वराङ्गोद्भवः,
ख्यातः सूरिसलक्षणः क्षितिपतेः सर्वत्र विश्वासभूः ।

आधारो विनयस्य शीलभवनं भूमिः श्रुतस्याकरः,
स्वाध्यायस्य कृतज्ञतैकवसतिः सौजन्यकोशालयः ।।७७।।
तत्प्रत्ययेन निदधे निखिलानि धर्म-
कार्याणि धर्मनिरतः स नरेन्द्रचन्द्रः ।
विप्रः स निस्पृहतया गुणगौरवेण
चित्तं विवेश समवृत्तितया च राज्ञः ।।७८।।
महीपालेन ये विप्रास्तस्मिन् ग्रामे प्रतिष्ठिताः ।
तेषां नामानि लिख्यन्ते विस्तरः शासनोदितः ।।७९।।
देवलब्धिः सुधीराद्यस्ततः श्रीधरदीक्षितः ।
सूरिः कीर्तिरथः सार्द्धपदिनो वै द्विजास्त्रयः ।।८०।।
गङ्गाधरो गौतमश्च मलकोऽथ गयाधरः ।
देवनागो वसिष्ठश्च देवशर्म्मा यशस्करः ।।८१।।
कृष्णो वाराहस्वामी च गृहदासः प्रभाकरः ।
इच्छाधरो मधुश्चैव तिल्हेकः पुरुषोत्तमः ।।८२।।
रामेश्वरो द्विजवरस्तथा दामोदरो द्विजः ।
अष्टादशैते विप्राश्च पदिनः षष्ठ [भो] द्विजः ।।८३।।
पादोनपदिको रत्नतिहुणेकौ सुरार्चकौ ।
द्वावर्द्धपदिनावेष विप्राणां संग्रहः कृतः ।।८४।।
ददौ देवपदानाञ्च मध्यादर्द्धपदं नृपः ।
विधाय शाश्वतं [लो]ह[1]भटकायस्थ सूरये ।।८५।।
देवाय दत्तो सौवर्णो राज्ञा रत्नैः समाचितः ।
मुकुटः सुमहान् मध्ये मणिर्यत्र विराजते ।।८६।।
हरिन्मणिमये भूपतिलकस्तिलकं ददौ ।
रत्नैर्विचित्रं ....सभूपतिः ।।८७।।
प्रादात् केयूरयुगलं रत्नैर्बहुभिराचितम् ।
कङ्कणानाञ्चतुष्कं च महार्हमणिभूषितम् ।।८८।।
इति रत्नमयन्तावदेकमाभरणं विभोः ।
द्वितीयमनिरुद्धस्य सौवर्णं केवलं यथा ।।८९।।

---

१. Read लेहि ।

कङ्कणानां चतुष्कञ्च तालपट्टद्वयं तथा ।
कृत्तिदारं स्वर्णमुष्टिम्बिभर्त्त्येन्वहमच्युतः ॥९०॥
रूप्यमङ्गालिहा दत्ता कञ्चोलैः पंचभिर्युता ।
नैवेद्यधारणार्थं च कांस्यस्थालचतुष्टयम् ॥९१॥
सुवर्णाण्डत्रयं देवपरिवारविभूषणम् ।
धृतं चोपरि हेमाब्जमातपत्रीकृतं विभोः ॥९२॥
निवेश्य ताम्रपट्टे च तन्मयेनैव गड्डुना ।
स्नास्यते प्रतिमा नित्यमनिरुद्धस्य राजती ॥९३॥
प्रतिमा वामनस्यैका द्वितीया लघुराच्युती ।
राजावर्तमयी चान्या द्वे पूर्वे रीतिनिर्मिते ॥९४॥
ताः प्रयत्नेन तिस्रोऽपि पूज्यन्ते गर्भवेश्मनि ।
तत्र ताम्रमयं दत्तं दीपार्थं मञ्चिकाद्वयम् ॥९५॥
स्नानार्थं ताम्रकुण्डे द्वे दत्ते द्वे ताम्रपात्रिके ।
ताम्रार्घपात्रद्वितयं तथा दत्तं महीभुजा ॥९६॥
सधूपदहनाः सप्त घण्टाश्चारात्रिकान्विताः ।
दत्ताः शंखाश्च सप्तैव ताम्रपात्रीचतुष्टयम् ॥९७॥
सकांस्यवाढढां प्रादान्नृपतिः काहलाद्वयम् ।
चामरं दण्डयुग्मञ्च रीतिस्फटिकसम्भवम् ॥९८॥
बृहच्चरुद्वयं ताम्रमयं ताम्रालुकाद्वयम् ।
ताम्रभाण्डास्तथा पञ्च दत्ताश्चाटुश्च तन्मयम् ॥९९॥
एष देवोपकरणद्रव्याणां संग्रहः कृतः ॥१००॥
शिलाकुट्टस्थपत्यादि यन्त्रिशाकटिकादिषु ।
वापीकूपतडागादिखननाबन्धनेषु च ॥१०१॥
दशमांशं तथा विंशत्यंशं सर्वत्र मण्डले ।
ददौ राजाऽनिरुद्धाय तेन सत्रं प्रवर्तते ॥१०२॥
अयं देवालयः पद्मनृपतेः स्फटिकामलः ।
भूयादुपार्जितः पुण्यैर्विष्णुलोक इवाक्षयः ॥१०३॥
भारद्वाजेन मीमांसान्यायसंस्कृतबुद्धिना ।
कवीन्द्र-रामपौत्रेण गोविन्दकविसूनुना ॥१०४॥

कविना मणिकण्ठेन सुभाषितसरस्वता ।
प्रशस्तिर्द्विजमुख्येन रचितेयमनिन्दिता ।।१०५।।
प्रतापलङ्केश्वरवाग्द्वितीयां बिभ्रत् सुहृत्तां मणिकण्ठसूरेः ।
अशेषभाषासु कविर्लिलेख वर्णान् यशोदेवदिगम्बरार्कः ।।१०६।।
एकादशस्वतीतेषु संवत्सरशतेषु च ।
एकोनपञ्चाशति च गतेष्वब्देषु विक्रमात् ।।१०७।।
पञ्चाशे चाश्विने मासे कृष्णपक्षे नृपाज्ञया ।
रचिता मणिकण्ठेन प्रशस्तिरियमुज्वला ।।१०८।।
अङ्कतोऽपि ११५०।। आश्विन बहुलपंचम्यां श्रें [।।]
तैस्तैस्तस्य महीपतेः प्रतिरणं प्रौढप्रतापानले,
नाश्चर्यं यदनेकशो रिपुचमूचक्रैः पतङ्गायितम् ।
यस्येन्द्रप्रतिमस्य बुद्धिसहितः सर्वज्ञकल्पोभवन्-
नीत्या निर्जितसौर्यवंशतिलकाचार्यः स गौरः सुधीः ।।१०९।।
किं चित्रं यन्महीपालो भुनक्ति स्माखिलां महीम् ।
यस्य गीर्वाणमंत्रीव मंत्री गौरोऽभवत् सुधीः ।।११०।।
प्रशस्तिरियमुत्कीर्णा सद्वर्णा पद्मशिल्पिना ।
देवस्वामिसुतेन श्रीपद्मनाथसुरालये ।। ११।।
तथैव सिंहवाजेन माहुलेन च शिल्पिना ।
प्राप्नुवन्तु समुत्कीर्णान्यक्षराणि यथार्थताम् ।।११२।।

लिखितं विप्र गोपीचन्द शर्मा गौड़ जयपुर निवासी मिती पौष कृष्णा ४ भौमवासरे सम्वत् १९९४ विक्रमी ता० २१ दिसम्बर सन् १९३७ ई०।। लिखायतं पुरोहितजी श्री हरिनारायणजी बी० ए० विद्याभूषण ।। महाराजा श्रीसवाईमानसिंहजीराज्ये ।।शुभम्।।

62. चाटसू का शिलालेख । (बालादित्य) ।

[(१) (२) आदि संख्याएँ शिलालेख की पंक्तियों की द्योतक हैं ।]

(१) [ओंन] मः । याब्जज [न्मभु] खाब्ज श्रीः श्रीमतां या विरोधिनी ।
तां वन्दे वाङ्मयो देवीं वाक्प्रपंचप्रसिद्धये ।।१।।
एकोपि [गु]ण संपर्काद्भिद्यते मुरजित्त्रिधा ।
योज [ग]..................स्तु [वः श्रि] ये ।।२।।

अक्रान्तभूतलमघौघविघातदक्षं गं[गा](२)[प]यः परिचयेन विराजमानम् ।
पायादनन्तमुनिलोकनिषेवितं वो वारीव यामुनमधोक्षजपादयुग्मम् ॥३
[ए]का त्वं हृदयं ममाधिवससीत्युक्तं त्वया [कैतवात्],
[का तेऽसौ] प्रियवल्लभा यदपरा स्वौरःस्थले शायिता ।
इत्थं कौस्तुभदर्प्पणे (३) प्रतिमितं स्वां वीक्ष्य पद्मा हृयं,
सासूयं स पराङ्मुखीमनुनयंस्तां पातु वो [मा]धवः ॥४॥
त्यक्त्वासून् प्रियविप्रयोगविधुरा गोप्यो दिवं या ययु-
स्ता एतास्तव पूर्व्ववद्रतसुखं प्रत्यागताः सेवितुं ।
इत्युक्तः फणिनः फणामणिगणे दृष्ट्वात्मनो बिम्बिता—
न्यःसे त्वांर —(४) मग्र[ा] मुरारिरवतात्प्रत्याययन्वः सतां ॥५॥
नीरन्ध्रः प्रथितः पुरः पृथुतरः प्रोत्खातभूभृत्कुलो,
व्याप्तासो जनितप्रतापदहनोप्यासादिता स्वोन्नतिः ।
अन्तः सारतरोऽरिकुंजरकरव्याघातदक्षोऽभव-
द्वंशस्तद्विपरीत एष [गु]हिलस्याद्वा(धा)र (५) भूनो [भु]वः ॥६॥
अस्तग्रामोपदेशैरवनतनृपतोन् भूतलं भूरिभूत्या
भूदेवान् भूमिदानैस्त्रिदिवमपि मखैर्न्न[न्दय]न्नन्दितात्मा ।
ब्रह्मक्षत्रान्वितोऽस्मिन् समभवदसमे रामतुल्यो विशल्यः,
सौर्याढचो भर्तृपट्टो रिपुभटविटपिच्छेदकेलीपटीयान् ॥७॥
ली-(६) लाक्रा[न्तमहा] महीभृदवनिर्ग्गौरीकुचालि[ङ्गन]—
व्यापारैकरसोप्यभिन्नहृदयो बाणैर्मनोजन्मनः ।
भास्वद्भूतिवि[भू]षि [तः] कृतवजिन्नित्यं विशुद्धे वृ[षे],
तस्मास्था .. ..रिव व्यजायत नृपादीशानपूर्वोभयः ॥८॥
उपहृतवृषो याश्चालम्बाल्लघुत्वमुपागतः,
कृतजड़रति(७)र्म्मायि[चा]रो द्विजिह्वसमाश्रितः ।
हरिरहमहो ना [स्मीत्युच्चै] र्व्विवाह[म]रिं,
[म]धोरहसदिव यो भूपः सोभूदुपे[न्द्र]भटस्ततः ॥९॥
[कला]समुद्योतितसर्व्वभूतले निजोदयानन्दितभृत्यकैरवः ।
उदीर्णधामा परि [पुरि] पूर्ण मण्डलः शसीव जज्ञे गुहिलस्ततो नृपः ॥१०॥
(८) मानं मानवतां मतिमतामानन्दमानन्दिनां
कोशं [को] शवतां बलं बलवतामुद्योगमुद्योगिनां ।

सत्त्वं सत्ववतां स्थितिं स्थितिमतां दुर्गाणि दुर्गाश्रितां,

यः शौर्यादिह[रो]द्विषां स धनिकस्तस्मात्प्रजज्ञे प्रभुः ॥११॥

करविहितजयश्रीः स(श)त्रुशल्यावसादा-

दजितनरसहायो भीमसेनानुदातः।

.... स्याद्योयमानन्दकारी

[सुत] इव तपसोऽस्माद[भं]कोऽभूत्स भूपः ॥१२॥

चक्राक्रान्तिवक्रो हतनरकभयानन्दिताशेषलोको

लक्ष्मीलाभाद्विशेषप्रच [नि]तपरमुद्ध्वस्तविद्वेषबाणः।

सा (१०)धूनां सत्वसत्वस्थितिमुपविदधन्निग्रहं पाप[भाजा-]

[म]म्भोधिप्राप्तकीर्त्तिर्म्मधुजि [दि]व ततः कृष्णराजो बभूव ॥१३॥

प्रतिज्ञां प्राक्कृत्वोद्भटकरिघटा संकटरणे,

भटं जित्वा गौडक्षितिपमवनिं संगरहृतां।

बलाद्दासीं चक्रे [प्र]भुचरणयोर्यः प्रणयिनीं,

ततो भूपः सोभूऽज्जितबहुरणः शंकरगणः ॥१४॥

सेनानागर्धनमदक[लै]र्मन्दरा[गेन्द्रतुङ्गै]-

र्यस्यासंख्यैः श्रियमिव दिशां [जेतु]राकर्ष्टुकामैः।

अन्तर्मग्नं विविध कुपतिश्लेषदुक्खादुरत्वान्-

भूयो नीतो मथनसमदप्रव्यथां क्षोभिताम्भः ॥१५॥

क (१२) न्दर्प्पो रूपदर्प्पं रविरतुलमहो देवमंत्री समंत्र-

शार्ङ्गी संग्रामवातं दश[शत]नयनो नाकधामाधिपन्यं [त्यम्]।

मन्ये श्रीशं जहौ श्रीः श्रुतिनिहित[म]तिं लज्जयाम्भो[ज]जन्मा,

यस्मिन्पृथ्वीं प्रशासत्य[स]मगुणजितानेकनाकप्रधानो[ने] ॥१६॥

महामहीभृतः पुत्री शिवा(१३)नन्दित मानसा।

ने[ते]नोढा पार्वतीतुल्या यज्ञा नाम यश[स्विनी] ॥१७॥

.... निश्चलमतिं शक्तिं दधानं परां

सेनारक्षणदक्षमुग्रमहसं व्यावृत्तविद्वेषिणं।

सानन्दं शिखिनः परिग्रहितया श्रीहर्षराजद्विजं

तस्यां वीरमजीजनत्स तनयं स्कन्दोपमं भूभुजं ॥१८॥

(१४) वीरैर्वैरिचमूविनाशकुशलैर्हैत्रिन्वतो ....,
.... वारणवंशजैर्गिगरिशिरस्तुंगैर्मदान्धैर्गजैः ।
जित्वा यः सकलानुदीच्यनृपतीन् भोजाय भक्त्या ददौ,
शक्तान्सैकतसिन्धुलंघनविधौ श्रीवंशजान्वाजिनः ।।१९।।
योशेषजन[संज्ञातां]शिखामिव विभावसोः ।
व्युवाह विधिना सि[ल्ला]मुल्लसद्विशदद्युतिं ।।२०।।
कान्तानां हृदये स्वमुक्तसशरं रक्षां विधातुं स्मरं,
तद्भेदादिव शंकितः स्मृतिपथं यातोपि यो दूरतः ।
सौभाग्याञ्जनबल्ल(१६) भोपि नितरामुद्वेगकृद्द्वेषिणां,
तस्या श्रीगुहिलः सुतेन जनितः पुत्रः प्रभावान्वितः ।।२१।।
भूयो [वा] तरदेष संगरभरान्वोढुं समर्थोस्न[ख्र]वित्,
वैरं पूर्वभवोद्भवं पृथुयशा देवो नरः संस्मरन् ।
नूनं नो विनिहन्तुमायतभुजश्चाप(१७)च्युतैः सायकै-
रित्याशंक्य रणांगणादरिगणा यस्य द्रुतं विद्रुताः ।।२२।।
पीनोरस्कैरुदंचत्कुलिशखरखुरक्षुण्णपूर्वाब्धितीरैः,
संग्रामाम्भोधिपोतैरुदधिभवमहाबाहुवंशप्रसूतैः ।
जित्वा गौडाधिनाथं विबुधजनबधूगीतसत्कीर्त्तिराजौ,
प्राच्येभ्यः प्रा[पा]र्थिवेभ्यः प्रचुरतरकरं योग्रहीत्स्वामिनिष्ठः ।।२३।।
[लक्ष्मीं] चान्द्रमसीमिवोन्मतिमतिं स्वच्छाम्बरोद्भासितां,
आविर्भूतकलां स्वकान्तिविशदामीशयानन्दितां
यो-म[भो]धेरिव वाहिनी परिगताज्जातां सुरत्नालया—
दूहे बल्लभराजतो नरपतेरज्झां प्रमाराच[न्व]यात् ।।२४।।
(१९) राज्यं स्वीयंदधानो जितखरसमाश्चापधूतारिसारः
सुग्रीवाद्भासमानो जनितजन[को सु]त्सांगदः सत्त्वयुक्तः ।
तस्मात्तेनोदपा(या)दिप्र[णमद] वनिभृन्मौलिभिश्चुम्बिताङ्घ्रि-
र्भट्टः काकुत्स्थकल्पो भरितकृतरसो नित्यलोनः सुमंत्रे ।।२५।।
आक्रान्ता वीक्ष्य सैन्यैर्व्वित ..... (२०) तटो भग्ननानानगौघाः,
भीतो बन्धादिवालं पुनरमृदमरुद्वेपमानोर्म्मिबाहुः ।
यस्यादाद्दक्षिणाब्धिः समिति जितवतो दाक्षिणात्यान्क्षितीशा—
नीशादेशादशेषान् लसदसमरुचो वेलया रत्नराजीः ।।२६।।

गंभीरापि समुन्नता परिजने लोलापि नित्यं स्थिरा,
लाव(२१)ण्योपचितापि वाचि मधुरा शांता[पि] रक्ता प्रिये ।
श्यामा पीनकरप्रसाधितमुखी मुग्धापि दक्षा विधौ,
तेनोदौहन[ह्न]तवीरुकस्य तनया तन्वी पुराशाभिधा ॥२७॥
न्यस्तांघ्रि प्रथमं महीधरशिरस्याक्रांतकाष्ठं हयै,
सम्यग्वर्द्धितमण्डलं समुदयैर्द्दोषात्ययैर्भासितं ।
मुष्णंतं निजतेजसा प्रसरता तेजांसि तेजस्विनां,
बा(२२)लादित्य प्रसूत सा मृदुकरैरानन्दयन्तं प्रजाः ॥२८॥
पद्मानन्दकरोप्यरातिसरसामुद्ध ूतपद्मोदयो,
प्रान्ताशोप्यचलस्थितिर्मृदुकरोप्युग्रप्रतापोद्गमः ।
आरूढोप्युदयं हतास्तसमयः सौम्योपि दुर्द्दर्शिनः,
बालार्क्कोपि निशा निषो वितरती रक्तोपि यो निर्म्मलः ॥२९॥
लोलोपालांशुमाली ग्लपयति कुमदा⋯⋯(२३)
[नित्यं] प्राप्तोदयोपि [व्रजति पुनरधः खिन्न]पादप्रचारः ।
वैकल्यं लोचनानां वितरित [रति]सततां [तं]लोकभाजां नराणां,
इत्थं येनासमन्ताज्जगति न जनिता तुल्यता तेन सार्द्धम् ॥३०॥
वि[ग]त पुरुषभावा यस्य चण्डप्रहारै—
रतिशयमृदितांग्यः पीडिताः साधनेन ।
युवतय[इ]व मृद्यो द्रावयेत्यः (यन्त्यः)स्ववेगा-
दधिकरणमशक्ताः शत्रुसेना विसोढुं ॥३१॥
विहमं(विष्णं)(२४) नि[वि]षयं पुराणमरसं मायाविनं निर्ग्गुणं,
मुक्त्वा [देश]वयोरसार्जवगुणैर्यु[क्तं भजस्वो]चितं ।
बालार्कं नृपमादरादिति रमां वक्तुं प्रपाता स्वयं,
कीर्त्तिर्यस्य हिमांशुधामधवला दूतीव दुग्धोदधिम् ॥३२॥
चाहमानशिवराजतनूजां रहनामुदधिजामिव भव्यां ।
कान्तरत्ननिचितामुपयेमे सौरिलब्धविजयः कमलेशः ॥३३॥
विजित्य सौभाग्य[गुणैः] सपत्नीरपायरूपार्ज्जव[यौ]वनाढ्याः ।
उवास पत्युर्म्मनसि प्रकामं या राजलक्ष्मीरिव लोकवंद्या ॥३४॥
प्रसूत या बल्लभराजमादौ ततोऽपरं विग्रहराजमार्यं ।
सुतं तृतीयं त्रिदशेन्द्रतुल्यं श्रीदेवराजं गुरुभक्तिभाजं ॥३५॥

यः प्रालेयौघगौरो गुरुभिरुपचितो ग्रावभिः सर्व्वसारै[:],
प्रोत्तुंगाग्रो विचित्यो विकटकटतटासन्नभूभारगाढ़ः।
स प्रासादो मुरारेरकलितमहिमाश्चेष्टतो बालपूष्या-
याता या देवलोकं तुहिनगिरिरिव श्रेयसेऽकारि तस्याः ॥३६॥
यावत्कौस्तुभमुद्गभस्तिमुरसा धत्ते मुदा माधवो
निष्कंपः कनकाचलः परिवृतो यावत्सुरैः शोभते।
यावद् भूरवतिष्ठते पृथुतरा शेषे सकूलाचला,
तावद् मन्दिरमुन्नतं स्थिरतरं भूयादिरंभूतये ॥३७॥
(२७)(राज्ञो)बुधेषु निकटे(स्व)पि बालभानोः,
कौतूहलोत्कलिकया न कवित्वदर्प्पात्।
छित्तात्मजः करणिको हरिविप्रभक्तो,
भानुः प्रशस्तिमकरोत्पटुबुद्धिरेताम् ॥३८॥
उत्कीर्णा प्रशस्तिमिमां(रियं ?) सूत्रधाररजुकसुत भाइलेन संवत्.......

---

63. बीसलजी के मन्दिर में शिलालेख

(निज मन्दिर के बाहिर बायें हाथ की तरफ जो खम्भ है, उस पर के लेख)

१ (१) ००॥ स्वस्ति समस्तराजावलीसमालंकृतपरमभट्टारकमहारा-
२ जाधिराजपरमेसर श्रीःपृथ्वीराजदेवराज्ये तंत्र तस्मिनु काले संवत् १२४४
३ श्रावणप्रव्वं (पर्व्वं) सपादलक्षे देवं श्रीः अजोगंधश्रीमहामालादि देव-
४ कुलाधिकारिनि योगीद्रः श्रीमयधरसुत दु (टु) श्रीवदुदाकेन श्री-
५ विग्रहपुरे देवश्रीगोकर्णमंडपे : : लिकाष्टौ कारापित्त ॥ परं दुः-
६ श्रीवहुदापृष्ठिपालगौडान्वये ठ श्रोसेढलसुत ठ नान्तकः क-
७ र्म्मांतरं वलापितमिदं ! तद्देरवो साष्टांगेन नित्यं प्रणमति।
८ माप्रत्ति परवित्तेषु। मारति परज्योषितु। परोपवादनोवाच।
९ मामेदेवप्र(स्थ)याजेया ॥१॥ सुभं भवतू। लेपकपाठकयोः ॥

---

१ (२) ऽ देवश्रोगोकल्लनाथसानयगमान्वये काय–
२ स्थातिऽगीव सित्रसानेव ० श्रीवत्सपुत्रपदम–

३ वाहड वाहगदीना । नित्यमेव साष्टांगेन प्रणमति
४ सं० १२३३ । पौष सु० १५

---

(३) १ सेंव्रघ्नरालासितवष्टुगासातवसासयाह
२ स० १३१ फा० सु० ८ श्रीत्रिविक्रमसुत पीवडकयोगेस्वर
३ कुमाकुरवंदन श्रीगोकर्ण नित्यं प्रणमति ।

---

१ ऽ सिध्रित्रधर साल्हाषे धराणीधर महिवडधरे
२ नित्यं प्रणमति । स० १३१ पौ सु० १५

(मंदि[र]के बाहरके खंभे पर)

१ ऽ स्वस्ति ॥ देवश्रीगोकर्णस्य दुःश्रीराज्यपुत्रघाल्हणो तत्र
२ नु दिन प्रणम्यति । संवत् १२४४ श्रावण प्रर्व्वं ॥

उक्त शिलालेख की नकल के साथ संग्रहकर्त्ता पुरोहित श्रीहरिनारायणजी की निम्न टिप्पणी भी है—

राजमहल के पास "बीसलपुर" ग्राम में एक पुराणी चाल का पाषाणमय शिखरबंध मन्दिर है, जिसको बनावट और कारीगरी को देख चक्कर आता है।

सभामण्डप में आठ खंभे ऐसे हैं जिनके जोड़ पाँच-पाँच हाथ लम्बे और (५।)=और पाँच-पाँच हाथ का लपैट है। इनमें पत्थर की कुराई अच्छी है। पुतलियां चार २ हरेक खम्भे में हैं। पुतलियों के नीचे चार २ मूरतें (एक के नीचे एक) हैं। ये मूरतें जैनियों की-सी प्रतीत होती हैं। खम्भों के ऊपर लटकती हुई मल्लाकार चतुर्भुज मूर्तियाँ हैं। इन से ऊपर उसी खम्भ का एक ३ हाथ लम्बा टुकड़ा उस पर इन से कुछ छोटी आठ मूर्त्तियाँ वैसी ही फिर हैं॥ निज मन्दिर के दरवाजे के ऊपर एक सिद्ध की मूरत है। इसी से प्रतीति होती है कि यह मन्दिर जैनियों का है (था) अब इस में इस समय एक बंडी सी जलेरी में एक बड़े से महादेवजी स्थापित हैं। और जहाँ मूर्त्तिस्थापन का स्थान है वहाँ किसी अन्य स्थान की बहुत पुराने समय की श्याम पत्थर में खुदी हुई एक चतुर्भुज शंख-चक्र-गदा-पद्म-वैजयन्ती-क्रीट-मुकुट-कुण्डलधारी खड़ी हुई श्रीविष्णु की मूर्त्ति है। वैसी ही उस के समीप एक दूसरी मूर्ति है। हिंडोले कहीं-कहीं फूट गिरे हैं। अब महादेव वा विष्णु का कोई भी पूजन नहीं करता।

पुस्ती इस मन्दिर की महान् अद्भुत। कोई लगभग ३० हाथ फेरी होगी। और तमाम पुस्ती पासे के आकार बहुत मोटी चौकियों से चारों ओर से बनी हुई है। एक-एक चौकी १५ मन से कम न होगी।

कुल काम पत्थर का है। और बनानेवाले ने इसी अभिप्राय से बनाया है कि चिरस्थायी रहे। परन्तु दुष्ट यवनों ने सर्व मूर्तियाँ फोड़ डालीं।

——

ग्वालियर दुर्ग के शिव मन्दिर में लगी लगी हुई प्रशस्ति की

प्रतिलिपि

(१) ....

(२) रव्याम् ।। तमन्वक प्रतापावनम्रारिमोलि स्रगभ्यर्चनीयाङ्घ्रिपीठोपकण्ठः
अधिष्ठाय गोपालिकैराधिपत्ये बभौ भूमिपालो महीपालदेवः ।।×।।
प्रति(तो)पाखिलक्षत्रियक्षोददक्षो य एकातपत्रां धरित्रीं व्यधत्त।
दिशादन्तिकुंभस्थलीशंखभूषां स्वकीर्त्ति त्रिलोकीतटान्ते न्यधत्त ।।×।।
वैवस्वत कर दण्डाश्लिष्टेपा..............................।
.... कुमुदवन विकासी रुद्राजा ।।×।।
पादानिह क्षितिभृतां दघतः शिरःसु देषायसारण पटोःस दिनश्रियश्च।
धामाधिकस्य तरणेरिव दु.सहत्वं यस्यावहद्दिशि दिशि प्रसरत्प्रतापः ।।×।।

उदार समरारंभो दूरे सुकुरुते रिपून्।
यस्य प्रयाणवार्तापि पलायनपरायणान्।
मेवस्य भालान्धकवर्त्मभेदं रुदाद्यपर्णालिकवू ।।४।।
सदागच्छतु कालयज्वा ।।

श्रीमान् बभूव मथुराभिजनो विमायः कायस्थवंशविपिनाम्बुधरः प्रहृष्टाः।
शिष्टास्त्रिवर्गपथगामिमनोरथस्य यस्याध्यगीषत मनोरथ इत्यभिख्याम् ।।

भुवनपालनृपद्रविणव्ययागमनियोगनिबंधनलेखिनः।
गणिततत्त्वसमस्तलिपिज्ञता गुणकृतस्तवनेऽस्य गुरुर्लघुः ।।
कान्ताङ्गका .... ललिताङ्गयष्टिः।

स्पष्टीकृतात्मकुलशीलकलानुभावा भावानुरक्तिपरमास्य रमेव विष्णोः ।।×।।
यो मानिनां कैरवकुण्डलानां प्रल्हा ....त्तमधादिवेन्दुः।
हेमा.नि चन्द्रश्चतुरर्णवाच(च्च)भ्रांतोरुकीर्तिस्तनयोऽस्य जज्ञे ।।×।।

स्मरारिपूर्वामरमूर्तिसुन्दरोदरास्मवेश्मप्रकटार्पितध्वजैः ।
मरुद्‌धुतैस्तर्जयदङ्घ्रिनामघान्यचीकरत्कीर्तनमा..................।।६।।
....विधानेषु यतस्तदीया ।
शुचिस्मितोल्लासितहारकान्तिस्ततो जनैराप्तमतिर्निरूचे ।। × ।।
त्रिजगद्वितताात्मयशोविशदीकृतदिक् स तयो–
स्तनयोभिजनोज्वलसर्वनिजान्वयजाब्जरविः ।
मधुसूदन इत्यजनिष्ट विशिष्टगुणप्रणयः
स्तुतयोगुरुदारगुणं प्रति संप्रति यं विदुषाम् ।। × ।।
यशोविकासो मधुसूदनस्य भास्वन्मयूखा ....।।७।।
....................चूर्यमाणः क्षयमापदिन्दुः ।
येन त्रिलोकजनताशयशुद्धिहेतुधर्मोऽपि निर्मलतमः क्रियते स्म शश्वत् ।
तस्यावदातचरिताद्भुतवर्णनायामोजोविजृम्भितमहो यदि शारदाय ।। × ।।
कराञ्जलिपुटोद्धृतं जलमिवैष श [श्व]त्सुधीः,
समग्रजयदंगिनां प्रगलदायुरालोचयन् ।
श्रुतैधितशमाम्बुसंशमित रागपात्रापि..........................।।८।।
आशासु यः शिष्टजगज्जनस्य श्रियं न्यधादात्मकरावकृष्टाम् ।
जना यदोयावरजं तमाशा चन्द्रं जगुः प्रीतिगुरुं सुवृत्तम् ।। × ।।
पतितप्रपतत्प्रपतिष्यदमर्त्यगृहोद्धरणैः स्वभुजार्जित शुद्धधनव्ययबृंहितपुण्यनिधि. ।
यतिविप्रवरार्तविपन्नजनार्तिहरो भवनं भवनाशकरस्य हरस्य स कारयति स्म कृती ।। × ।।
विद्वद्वृन्दाम्बुजवनरविःश्रीजनिग्रन्थनाथः ।
यः सद्भाषाविततकविताकेतुहर्म्यं कलानां
पूर्वा(र्णा)मेतामकृत स मुनिः श्री यशोदेवनामा ।। × ।।
मनो भवान्धकारातिविघातकरणो भवः
दद्याद्वो संपदो देवो यागजाजिनभूतिभृत् ।। × ।।

श्रीविक्रमार्कनृपकालातीतसंवत्सराणामेकषष्ट्यधिकायामेकादशशत्यां माघशुक्ल षष्ठ्यां प्रतिष्ठाभूत् ।।

———

APPENDIX 3

(Extracts from important Manuscripts)

2. Late Pt. L. N. Sāstrī Dādhīca Collection

19. आशौचसंग्रहः

OPENING :

॥ श्रीगणेशाय नमः ॥

प्रणम्य लक्ष्मीनृहरिं गणेशं शारदां गुरुम्।
भट्टरामेण विदुषा क्रियते शौचसंग्रहः ॥१॥
तत्र प्रथमतः स्नानाशौचं निरूप्यते । पाराशरः—
आचतुर्थाद् भवेत् स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्द्ध्वं प्रसूतिः स्याद् दशाहं सूतकी भवेत् ॥इति

CLOSING :

तैलोषध्यजिने चैव पक्वापक्वे स्वयं ग्रहः ।
पण्येषु चैव सर्वेषु नाशौचं मृतसूतक इति ॥
पक्वापक्वसंग्रहस्तु अन्नसत्रप्रवृत्तिविषयः ।
रामतत्सद्विरचितःशौचाशौचविनिर्णयः ।
साकरः शास्त्रपारज्ञैः सद्भिः सम्यग् विभाव्यताम् ॥इति

COLOPHON :

इति श्रीरामतत्सद्विरचितः संक्षेपेण काश्यामाशौचसंग्रहः समाप्तः ।

Post-Colophonic :

संवत् १८१४ का मिति भाद्रपद शुक्लपक्षे तिथौ ॥१५

23. समयदोधितिः

OPENING :

॥ श्रीगणेशाय नमः ॥ श्रीरामायनमः ॥ श्रीगुरुचरणेभ्यो नमः ॥
ॐम ॥ गणेशलक्ष्मीरमणसीतापतिवृषध्वजान् ।
सारदां शारदां नौमि गुरूंश्चाभीष्टसिद्धये ॥१॥
श्रीबुन्देलकुलेऽभवद्भुवि महावीरो वदान्यो वशी,
विज्ञो भूतलभूषणं मधुकरो भूमीमहेन्द्रः प्रभुः ।
तस्माद्योऽजनि वीरसिंहनृपतिः ख्यातो महीमण्डले,
येनानेकविधाः कृताः सुमनसां प्रासादपूर्त्तादयः ॥२॥

× × × ×

श्रीबुन्देलकुलोत्तमाङ्गमुकुटालङ्कारहीरः सुधीः,
श्रीमद्रामपदारविन्दनिरतो दारिद्र्यविद्रावणः।
शौर्य्याधःकृतफाल्गुनादिव सुधाधीशाग्रगण्योच्चयो
विज्ञः कोऽपि **सुजानसिंह** इति यः ख्यातो धराधीश्वरः ॥७॥
आस्यं हास्ययुतं वपुः पुलकितं वाक्यं सुधाधःकिरं,
स्वान्तं मोदमयं च लोचनयुगं स्वानन्दपूर्णेक्षणम्।
श्रुत्वैवार्थिजनं तदग्रगमनं यस्येदृशी जायते-
ऽवस्था तस्य मयाज्ञया सुकृतिना सत्सम्प्रदायानुगः ॥८॥
न्याये गौतमतोऽधिकः कणभुजः शास्त्रे कणादः परो
मीमांसाद्वयकाननाद्वयहरिर्वेदान्तसर्वस्ववित्।
योगे योगविदां वरः कपिलजित् साङ्ख्ये कवित्वे कविः,
साहित्येऽनुपमः स्मृतौ मनुसमः शाब्दे च यः पाणिनिः ॥९॥
विश्वामित्रकुलोद्भवो निजकुलोत्तंसः सतामग्रणीः
सर्वानन्दकरः **प्रभाकर** इति ख्यातः प्रभावाधिकः।
तस्माद्योऽजनि कृष्णसंज्ञसुमतिः क्षोण्यां सतां सम्मतो
भैयाभट्ट इतीह तेन विदुषा ग्रन्थोऽयमारभ्यते ॥१०॥
धर्मादेव भवत्यनर्थविलयः सम्यक् सदानुष्ठिता—
दर्थः कामफलोदयश्च सुधियां मोक्षोऽपि तस्मादिति।
बुन्देलेन्द्रसुजानसिंहरुचये रत्नाकरं कुर्वतां
भैयाभट्टविदामयं समुचितः सर्वोपकारः सताम् ॥११॥
× × × ×
सुजानधर्मरत्नाख्यो विख्यातोऽस्तु महीतले।
रामचन्द्रप्रसादेन कल्पस्थायी भवत्वसौ ॥१३॥
साम्प्रतं तत्र समयः सम्यक् **समयदीधितिः**।
निरूप्यते यत्समयमनीषा सुखतो भवेत् ॥१४॥

CLOSING .: सर्वाणि नामसनि(मानि)हितस्य राजन् सर्वार्थसिद्ध्यैहि भवन्ति पुंसः।
तस्माद्यथेष्टं खलु देवनामा सर्वेषु कार्येषु जपेत्तु भक्त्यैति ॥
॥ इति विष्णुनामसङ्कीर्त्तनकालस्य निर्णयः ॥
सुजानधर्मरत्नेऽस्मिन् समयो नाम दीधितिः।
भैयाभट्टेन विदुषा यथामतिविधेचितः ॥

COLOPHON : इति श्री महाराजाधिराजसुजानसिंहादेशाद् भट्टभट्टारकभट्टप्रभाकर सुरिसूनुना भैयाभट्टेन प्रकाशितः समयदीधितिः सम्पूर्णः ।। श्रीरामार्पणमस्तु ।।ॐ।।द।।द।।

25. आचारचन्द्रिका

OPENING : ।। श्रीगणेशाय नमः ।।

नत्वा श्रीशारदां देवीं श्रीगुरुं लक्ष्मणाभिधम् ।
विद्वच्चकोरसुखदां करोम्याचारचन्द्रिकाम् ।।१।।

ब्राह्मे मुहूर्त्ते शयनादुत्थाय वस्त्रान्तरं परिधाय हस्तौ पादौ मुखं च प्रक्षाल्य द्विराचम्यात्मनोऽन्तर्यामिरूपेण सत्कर्मानुष्ठानप्रवर्त्तनरूपं तत्कर्त्तारं च परमात्मानं चिन्तयेत् कीर्त्तयेच्च ।

CLOSING : मूलमारभ्य केशपर्य्यन्तं मध्ये शून्यं वेणुपत्राकारं ललाटे इतरेपूदरहृदयकण्ठदक्षिणपार्श्वदक्षिणबाहुदक्षिणकर्णवामपार्श्वं ......

82. भोजनविधिः

OPENING : ।। अथभोजनविधिः ।।

व्यासः— पञ्चार्द्रो भोजनं कुर्यात् प्राङ्मुखो मौनमाश्रितः ।
हस्तौ पादौ तथैवास्यमेषु पञ्चार्द्रता मता ।।

CLOSING : मनुः — यद्युत्तिष्ठत्यनाचान्तो भुक्त्वा चैवासनात्ततः ।
सद्यः स्नानं प्रकुर्वीत सोऽन्यथा प्रयतो भवेत् ।।

COLOPHON : इत्याचारदीपे भोजनविधिः ।।

131. दशश्लोकी गीता 'तत्त्वसारप्रकाशिनी'टीकायुता

OPENING : ।। श्रीमते निम्बार्कायनमः ।। श्रीकृष्णायनमः ।।

श्रीमन्मदनगोपालपादपङ्केरुहद्वयम् ।
प्रणम्य क्रियते व्याख्या तत्त्वसारप्रकाशिनी ।।

(मूलम्) ज्ञानं स्वरूपं च हरेरधीनं शरीरसंयोगवियोगयोग्यम् ।
अणुं हि जीवं प्रतिदेहभिन्नं ज्ञातृत्ववन्तं यदनन्तमाहुः ।।

(टीका) इह खलु सकललोकहितावतारः **सुदर्शनः श्रीनिम्बार्को** भगवान् सुमन्दमतीन् जनान् वीक्ष्य तेषामात्मानात्मपरमात्मसम्बोधाय **दशश्लोकी**मपि चकार । साधनत्वेन साध्यत्वेन च श्रीगोपालचरणकमलमधिगच्छतां सतां पदार्थत्रयमेवोपादेयम् । पदार्थत्रयं च आत्मानात्मपरमात्मा चेति । तत्र प्राप्तितया जीवात्मनो हेयत्वे नानात्मनः प्राप्यत्वेन च परमात्मनो निरूपणम्, तत्रादौ श्लोकद्वयेन जीवस्वरूपं जीवानां परस्परं भेदश्च निरूप्यते ज्ञानस्वरूपक्रियादिना ज्ञानस्वरूपमित्यनेन जीवस्य जडत्वव्यावृत्तिः क्रियते । तथा च श्रुतिः–योयं विज्ञानघनः अत्रायं पुरुषः स्वयं ज्योतिरित्यादित्वात् ज्ञानाश्रयत्वम् । तथा च ज्ञानाश्रयत्वे सति ज्ञानस्वरूपत्वमात्मत्वमिति लक्षणत्वं फलितम् विस्तरेण ।।१।।

CLOSING : प्रपत्तिः शरणागतिः, सा च षोढा—

अनुकूलस्य सङ्कल्पः प्रतिकूलस्य वर्ज्जनम् ।
रक्षिष्यतीति विश्वासो भर्तृत्वे वचनं तथा ।।
आत्मनिक्षेपक(का)र्पण्यं षड्विधा शरणागतिः ।

इति कुमारोक्तेः ।
भवतापप्रहर्त्तारं वाञ्छितार्थप्रवर्षिणम् ।
आश्रयं सुविहङ्गानां निम्बार्कं प्रभुमाश्रये ।।१।।

COLOPHON : **इतिश्रीनन्ददासविरचिता तत्त्वसारप्रकाशिनी दशश्लोकीटीका समाप्ता।**
श्रीमते निम्बादित्यायनमः ।।

Post-Colophonic : संवतु १८२९ आषाढे २

158. गालवाश्रममाहात्म्यम्

OPENING : ।। श्रीमते रामानुजाय नमः ।।

पुलस्त्य उवाच—

गालवाश्रममाहात्म्यं वक्ष्यामि ते महाप्रभो ।
यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ।।१।।

भीष्म उवाच—

कीदृशो गालवो नाम किमाचारो वदस्व मे।
आश्रमोऽस्य कुतो ब्रह्मन् पुष्करान्मुनिसत्तम ॥२॥

CLOSING : पुलस्त्य उवाच—

विश्वावसोः शीलगुणोपपत्नी आसीत् पुरन्ध्री शुभगा त्रिलोके।
लावण्यराशिः शशिकान्तितुल्या मन्दालसा नाम मदालसेव ॥
ता (सा)नन्दने देवरिपुस्तरस्वी संक्रीडती रूपवती ददर्श।
पातालकेतुस्तु जहार तन्वी तस्यार्थतः सोरवरो(?) प्रदत्तः ॥४२॥
हत्वा च दैत्यं नृपतेस्तनूजो लब्ध्वा वरोरूपि संस्थितोभूत्।
तद्दृष्टो यथा देवपतिर्महेन्द्रैः शच्यास्तथा राजसुता मृगाक्ष्याः ॥४२॥
एवं चरितमस्य त्वामुत्पत्तिः कथिता मुने।
आश्रमस्य च माहात्म्यं भूयः किं श्रोतुमिच्छसि ॥४३॥

COLOPHON : ईति श्रीपुराणसमुच्चये पुष्करमाहात्म्ये गालवाश्रममाहात्म्यं बि०-तमोध्यायः।

160. गोपव्रजीयम्

OPENING : ॥ श्रीगणेशाय नमः ॥

स ददर्श शुभे देशे गोवर्द्धनसमीपगे।
यमुनातीरसम्बद्धं शीतमारुतसेवितम् ॥

CLOSING : सा यत्र रोहिणी देवी वसुदेवसुखावहा।
तत्र तं वालसूर्याभं कृष्णं गूढं न्यवेशयत् ॥

COLOPHON : हरिवंशे गोपव्रजीय।

166. दधिमतीकपालदर्शनमाहात्म्यम्

OPENING : ॥ श्रीगणेशाय नमः ॥

ब्रह्मोवाच—

अथातः श्रूयतां वत्स पीठं कापालसंज्ञितम्।
यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥

यत्र देव्याः कपालं व पपात वृषभध्वजात् ।
ब्रह्मात्मकं महादिव्यं योगिध्येयं सनातनम् ।।
महामायामहाक्षेत्रं पीठानां चोत्तमोत्तमम् ।
सर्वतीर्थवरं चापि सिद्धिदं च ततोऽभवत् ।।
पुष्करादुत्तरे भागे योजनाष्टकमानतः ।
महामायामहाक्षेत्रं वर्त्तते चातिपावनम् ।।
तत्र ब्रह्मकपालस्था योगेशी योगतत्परा ।
सर्वाकारा निराकारा परा शक्तिर्व्यवस्थिता ।।
भद्राय सर्वलोकानां भक्तानामभयाय च ।
रहोदेशे महारण्ये एकैवैषा सुरेश्वरी ।।

CLOSING : इत्युक्त्वा वरदा देवी साक्षाद्दधिमथी सुतान् ।
अनुगृह्य प्रसन्ना सा कपालेऽन्तर्धीयत ।।२३।।
महामाया परं क्षेत्रं पुष्करादष्टयोजनम् ।
तस्य दर्शनमात्रेण शतयज्ञफलं लभेत् ।।२४।।

COLOPHON : इति विराट्पुराणे विश्वोत्पत्तौ सप्तर्षिसंवादे दधिमथीकपालदर्शनालसपापकथनं नाम सप्तत्रिंशोऽध्यायः समाप्तः ।।१७

Post-Colophonic संं० १९३७ जेष्ठ कृष्ण ५ भृगौ ।। श्रीरस्तु ।। शुभं भूयात् ।। शुभमस्तु ।।

191. शिरोमणिमूलटीका

OPENING : व्याप्तीति समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते-नन्वित्यादिना साध्याभाववदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेताव्याप्तिमाशंक्याह साध्यवद्भिन्नेति ।

CLOSING : अभावप्रत्ययो हि घटत्वादिविशिष्टघटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादिः तदवच्छेदकत्वमवच्छेदकत्वमवगाहते न तु स्वातन्त्र्येण घटो नास्तीत्येव प्रतीतिः । तदिहाभावप्रत्ययो हि यदि व्यधिकरणधर्मेण विशिष्टं प्रतियोगिनं नावगाहते । नावगाहत एव तदा तस्यापि प्रतियोगितावच्छेदकत्वं यथावगाहते तर्हि भ्रम एव । न च ततोऽर्थसिद्धिरिति

भावः। यदि पुनरानुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीति प्रत्ययस्तदा तादृशाभावनिराकरणं गीर्वाणगुरूणामशक्यमिति मन्तव्यम्।

COLOPHON : इति श्रीशिरोमणिमूलटीकायां व्य० (व्यधिकरणं) समाप्तम्

198. तर्ककारिका

OPENING : ॥ श्रीगणेशाय नमः ॥

सोमं शिवं नमस्कृत्य ध्यात्वा देवीं सरस्वतीम्।
बालानामतिबोधाय क्रियते तर्ककारिका ॥१॥
द्रव्याणि गुणकर्माणि सामान्ये सविशेषके।
समवायस्त्वभावाश्च पदार्थाः सप्तसंज्ञकाः ॥२॥

CLOSING : भेदस्तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिकः।
अभावो महितैः प्रोक्तो भूयान्नैव घटः पटः ॥१४॥
पण्डितानां प्रसत्त्यर्थं बालबुद्धेश्च सिद्धये।
ग्रन्थस्य चान्नम्भट्टस्य कृतेयं तर्ककारिका ॥१५॥
गुरोरनुज्ञामधिगम्य पूर्वं निधाय चित्ते हरपादपद्मम्।
मया कृतेयं कविहृत्सरोजे करोतु वासं कमलेव विष्णौ ॥१६॥

गिरीशभक्तरामसिंहभूपतेः प्रसत्तये,
विनिर्मिता सुतर्ककारिका विविच्य मेधया ॥
तथैव मन्त्रिमुख्यशम्भुदीनसुप्रसत्तये,
धरन्तु हृद्वनोद्भवे विचक्षणा इमां सदा ॥१७॥
श्रीकृष्णपादपद्मद्वयगतचेताश्च पाठशालेशः।
कृष्णस्वरूपनामा सुकीर्त्तिमात्रोगहीनोस्तु ॥१८॥
श्रीरामसिंहः शिवदीनमंत्री कृष्णस्वरूपश्च विशालबुद्धिः।
प्रीता भवेयुर्गुणिदुःखनाशा आयुर्युताः कीर्तियुता म एते ॥१९॥
अब्दे वेदहिमांशुनन्दजगतीभिः संयुते श्रीगुरोः
शाके नन्दसमुद्रवाजिविधुभिर्युक्ते तिथौ सौरिणा।
सप्तम्यां च तपस्यमासि च सिते पक्षे हरौ मध्यगे,
गोपीनाथकृता समाप्तिमगमद्बोधप्रदाऽबोधिनाम् ॥२०॥

COLOPHON : इति श्री जीवनाथानां गुरूणां शिष्यकेण च ।
कृता समाप्ति(प्ता)पुस्तेयं नामतस्तर्ककारिका ।।२१।।

Post-Colophonic : सं० १६१५ शा० १७८०

206. नव्यमतवादार्थः

OPENING : ।। श्रीगणक्रीडाय नमः ।।

वह्न्याद्यनुमितिं प्रति पर्व्वतीयधूमव्यापको वह्निरित्याकारकः परामर्शो हेतुर्न तु वह्निव्याप्यधूमवान् पर्वत इत्याकारकपरामर्शः । तद्धेतुत्वे कारणतावच्छेदककोटौ व्यापकसामानाधिकरण्यरूपव्याप्तिघटकीभूतसामानाधिकरण्यपदार्थविषयतानिवेशाधिक्येन गौरवमिति व्यापकताज्ञानहेतुता ।

CLOSING : अथ पर्वतत्वावच्छिन्नविशेष्यतानिरूपिताभावप्रकारतानिरूपितप्रतियोगितासंबद्धावच्छिन्नप्रतियोगिप्रकारतान्या या पर्वतनिष्ठविशेष्यतानिरूपितसंयोगनिष्ठसंसर्गतानिरूपितव्याप्यत्वावच्छिन्नप्रकारता तच्छालित्वमेव पर्वतत्वावच्छिन्नधर्मिकवह्निव्याप्यवत्तानिर्णयत्वं प्रकारता ……

216. परीक्षामुखसूत्रम्

OPENING : ।। श्रीजिनाय नमः ।।

।। अथ परीक्षामुखस्य सूत्राणि लिख्यन्ते ।।

श्लोक : प्रमाणादर्थसंसिद्धिस्तदाभासाद्विपर्य्ययः ।
इति वक्ष्ये तयोर्ल्लक्ष्म सिद्धमल्पं लघीयसः ।।१।।

स्वापूर्व्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् ।।२।। हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत् ।।३।। तन्निश्चयात्मकं समारोपविरुद्धत्वादनुमानवत् ।।४।। अनिश्चितोऽपूर्वार्थः ।।५।।

CLOSING : प्रमाणतदाभासौ दुष्टतयोद्भावितौ परिहृतापरिहृतदोषौ वादिनः साधनतदाभासौ प्रतिवादिनो दूषणभूषणे च ।।७३।। संभवदन्यद्विचारणीयम् ।।७४।। इति प्रमाणस्याभासोद्देशः षष्ठमः ।।६।।

परीक्षामुखमादर्शं हेयोपादेयतत्वयोः।
संविदे माहशो वालः परीक्षादक्षवद् व्यधाम् ॥७५॥

COLOPHON : इति परीक्षामुखप्रमाणप्रकरणवाक्ययुतिः ॥ अष्टाधिकद्विशतमिता ॥२०६॥ संवत्

222. व्याप्त्यनुगम-क्रोडपत्राणि

OPENING : प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्व-ग्रहविरोधित्वेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वबुद्धीनां कारणत्वं दीधितिकारसम्मतम्।

CLOSING : तथा उक्तसंशयेऽपि विवादाभाव इति हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावनिश्चयप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव-प्रतियोगितावच्छेदकत्वाभावनिश्चयसाधारणमेकनिश्चयत्वं न संभवति। पृथक् पृथक् निश्चयत्वप्रवेशे च नानुगतरूपेण कारणत्वं संभवतीति दोष इदं तु चिन्त्यत इत्यादिना जगदीशेनोक्तः।

(In a different handwriting)

COLOPHON : व्याप्त्यनुगमक्रोड चं(चां)द्रनारायणी

228. सव्यभिचारक्रोडपत्राणि

OPENING : ॥ श्रीगणेशाय नमः ॥

सधर्मितावच्छेदककहेतुमत्तानिश्चयकालीनयादृशविशिष्टविषयक-निश्चयसामान्यं स्वसमानकालीनहेतुमत्तानिश्चयसमानधर्मितावच्छेदककानुमितिसामान्यविरोधितादृशविशिष्टत्वं सव्यभिचारत्वम्। अत्रानुमितिपदं साध्यव्याप्यो हेतुरिति।

CLOSING : अभाववैशिष्ट्यं च प्रतिवध्यताघटितोभयसम्बन्धेन ज्ञानवत्त्वं च प्रकारतायां निरूपितत्वसम्बन्धेन। अन्यत्पूर्ववदिति विभावयन्तु सन्तः॥०।

COLOPHON : सव्यभिचारस्य गादाधर्य्याः क्रोडपत्रमिदं ॥ गंगाप्रसादस्य ॥

245. प्रश्नोत्तरमाला

OPENING : ॥ श्रीगणेशाय नमः ॥

अपारसंसारसमुद्रमध्ये सम्मंज्जतो मे शरणं किमस्ति।
गुरो कृपालो कृपया वदैतद् विश्वेशपादाम्बुजदीर्घनौका ॥१॥

CLOSING : कण्ठं गता वा श्रवणं गता वा प्रश्नोत्तराख्या मणिरत्नमाला ।
तनोतु मोदं विदुषां सुरम्या रमेश-गौरीशकथेव सद्यः ।।३२।।

COLOPHON : इति शङ्कराचार्यविरचिता प्रश्नोत्तरमाला सम्पूर्णम् ।।

266. अवताररहस्यनारायणरत्नावली

।। श्रीमते रामानुजाय नमः ।। श्रीमते विष्वक्सेनाय नमः ।।

OPENING :

प्रणौमि श्रीहयग्रीवं प्रणतामरपादपम् ।
प्रजापशुपती यस्य प्रसादेन जगत्पती ।।१।।
श्रीमन्तमेके प्रविहाय ये तु सर्वावतारित्वविचित्रशक्तिम् ।
तद्वैपरीत्यं प्रवदन्ति तद्वचः प्रध्वंसनायात्र परो हि यत्नः ।।२।।
श्रीमद्भागवतीयषड्विधमहातात्पर्य्यवीक्षाबलात्,
पद्यैश्चार्थविचिह्नितैर्भगवतो नारायणाख्यायुतैः ।
वक्तृश्रोतृबहूक्तिभिश्च सुगमोऽस्माकं हरिः श्रीसखः,
सः श्रीकृष्णवपुर्द्धरो विजयते नारायणोऽस्मत्प्रभुः ।।३।।

तत्र तावदवताररहस्यसम्पुटितश्रीमद्भागवतसारार्थसंग्रहं सर्ववैष्णव-विद्वज्जनानां हृदयाह्लादकरमेतन्नत्वन्यस्मै शपथोर्पित इत्युक्तिवत् स्वगोष्ठीनिष्ठानामेवेति चिन्त्यते ।

CLOSING :

परं तत्त्वं श्रीमद्गुणनिधिपरव्योमनिलयं,
स्वकीयेच्छाभिर्यद् विहरति च लीलापदगतम् ।
तदेतत् श्रीरामानुजवचनसंगत्यवगतं,
स्फुटं प्रोक्तं भक्तप्रसदनकरं स्यात्प्रतिपदम् ।।
परं तत्त्वं परं ब्रह्म श्रीमन्नारायणाभिधम् ।
अवतारैः सदा लीलाविभूतौ क्रीडति स्वयम्

इति शास्त्रविदुक्तिरनुसन्धेया इति सर्वं समञ्जसम् । अपरश्च केचिन्मत्सरिणोऽपि शृण्वन्तु ।

यतीश्वरसरस्वतीसुरभिताशय.नां सतां,
वहामि चरणाम्बुजं प्रणतिशालिना मौलिना ।

तदन्यमतदुर्मदज्वलितचेतसां वादिनां
शिरस्सु निहितं मया पदमदक्षणं लक्ष्यताम् ॥
इत्याचार्योक्तमिति ।

COLOPHON : इति श्रीअवताररहस्यनारायणरत्नावली सम्पूर्णा ॥
श्रीमते रामानुजाय नमः ॥
कावेरी वर्द्धतां काले काले वर्षतु वासवः ।
श्रीरङ्गराजो जयतु श्रीरङ्गः श्रीश्च वर्द्धताम् ॥१॥
श्रीरामो जयति ॥
श्रीवेङ्कटाद्रिनिलयः कमलाकामुकः पुमान् ।
अभंगुरविभूतिर्मे तरङ्गयतु मङ्गलम् ॥२॥
श्रीमते हयग्रीवायनमः ॥ श्रीमते नारायणाय नमः ॥ श्रीरामाय नमः ॥

291. राज्यस्तोत्रम्

OPENING : ॥ श्रीगणेशाय नमः ॥
भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ।
यमगृहशासनभूरिविलोडनरक्षणकरणे कोऽपि न ते
गृहिणी-भगिनी-दुहिता-सोदरमित्रकुलादिद्रव्यरते ।
तव नहि कोपि परं तद्दयिताचरणसरोजध्यानमृते,
भज भुवनेशीं स्मर भुवनेशीं नम भुवनेशीं मन्दमते ॥२

CLOSING : वृद्धो जातो जरया तप्तः कफयुतलालाघर्घरकण्ठः
पश्यसि किं रे कस्य कुटुम्बं संश्रय भुवनपीननितम्बम् ॥१७॥

COLOPHON : इति राज्यस्तोत्रम् ॥

313. कृष्णपुष्पाञ्जल्यष्टकम्

॥ अथ श्रीकृष्णाष्टकं लिख्यते ॥

व्रजपतिनन्दन सुररिपुभंजन दुष्कृतखण्डन लोकपते
कालियमर्द्दन कंसनिकन्दन यानीकृतखगवृन्दपते ।
गोपवधूभिरलंवृन्दावन-भूतलरासविलासरते,
जय जय हे शरणागतवत्सल पालय लोकममुं सुमते ॥१॥

नीलसरोरुहभासितविग्रह संसृतितापविनाशनकृत्,
वरवनमालाभूषितवक्षसि कमलालक्ष्मविभूषणधृत् ।
मायाजालनिकृन्तनखग चराचरवन्द्यगुणैकतते । जय जय हे० ॥२॥
नखधृतगोवर्द्धनगिरिनायकमर्द्दितमानसमूह हरे,
व्रजपरिरक्षणसक्षण हे परिहृतपरिपूजन नाकपते ।
आनकदुन्दुभिनिर्मितसुस्तुति-मोदविकाशितचित्त हरे । जय जय० ॥३॥
वारिजलोचन जनिमृतिमोचन कोटिविरोचनदेहरुचे,
कुटिलालकततिषट्पदभूषितमुखवारिज यदुवंशपते ।
क्षीरसमुद्रसुताकरपल्लवसेवितपादसरोज विभो । जय जय० ॥४॥
शुभमतिभक्तमनोऽब्जविकाशनमित्र सुपर्वविवंद्यजने,
पीतवसनरुचिशोभितकटितट कुण्डलभूषितकर्णरुचे ।
वंशीगीतविमोहितनिर्जर नारदतुम्बुरुगीतनुते । जय जय० ॥५॥
दुरितविशोषण मापरितोषण लोकविपोषण योगिपते,
अयि नवनीतापहरणचौरध्वंसितचित्ततमोविततेे ।
कृतगुरुतोषण परिधृतविद्य धृतमहाकलितापमहौष ···। जय जय० ॥६॥
कृतहरमोहन कृतगोदोहन गव्यवि[भोज]न भक्तपते,
सत्यं ज्ञानमनन्तं ब्रह्मेतिश्रुतिबोध्य हृषीकपते ।
भूमिजलाग्निनभस्वदनंतविनिर्मितिबीज भवाब्धितरे । जय जय० ॥७॥
तव पदपद्ममहं शरणं प्रकरोमि पुरेश विधेहि जयम् ।
नवघननीलमनन्तगुणं हृदि तिष्ठतु रूपमिदं सततम् ।
स्वीयतया समवेहि च मां शरणं सुरवर्य गुणेश पते । जय जय० ॥८॥

पुष्पाञ्जल्यष्टकमिदं गोपीनाथविनिर्मितम् ।
हस्तौ समानीय पठेत् कृष्णस्य प्रसादकृत् ॥९॥
इति श्रीदधीचिवंशोद्भवगोपीनाथविरचितं पुष्पाञ्जल्यष्टकं समाप्तम् ।
छ ॥ छ ॥ छ ॥

322. दधिमथ्यष्टकम्

॥ श्रीगणेशायनमः ॥
॥ अथ दधिमथि-अष्टकम् ॥
महामाया परक्षेत्रं पुष्करात् अष्टयोजनम् ।
तस्य दर्शनमात्रेण शतयज्ञफलं लभेत् ॥१॥

नत्वा दधिमथीं देवीं सच्चिदानन्दरूपिणीम् ।
वक्ष्ये तदष्टकस्तोत्रं सर्वसिद्धिप्रदायकम् ॥२॥
नानामंत्राश्च यन्त्राश्च(णि) तीर्थदानव्रतादयः ।
न शीघ्रं सिद्धिदा लोके कलौ दधिमर्थि विना ॥३॥
काली तारा महाविद्या षोडशी भुवनेश्वरी ।
बगला छिन्नमस्ता च विद्या धूमावती तथा ॥४॥
मातंगिका भैरवी च विद्या दश प्रकीर्त्तिताः ।
एता दशमहाविद्या दर्शनस्य फलं तु यत् ॥५॥
दधिमत्याःकपालस्य दर्शनादेव जायते ।
यत्फलं दशविद्यानां दर्शनेषु पृथक् पृथक् ॥६॥
तत्फलं दधिमत्याः श्रीकपालस्य च दर्शने ।
अहो भाग्यमहो भाग्यं मरुस्थलनिवासिनाम् ॥७॥
एषा दधिमथी देवी प्रत्यहं दृष्टिगोचरा ।
यत्तप्तसुमहातापं मरुभूम्यां निसर्गतः ॥८॥
तत्पुण्यस्य प्रभावेन देवी दधिमथी स्थिता ।
भाग्यहीना न पश्यन्ति तत्कपालस्य दर्शनम् ॥९॥
कपालमहिमा त्वेषा यत्कपालस्य दर्शनम् ।
गत्वा दधिमती देवी गन्तव्या नावशिष्यते ॥१०॥
अर्चयित्वा सकृत्तां तु कृतकृत्यो भवेन्नरः ।
ब्राह्मणः क्षत्रियो(या) वैश्याः शूद्राश्चावरवर्णजाः ॥
ये ज़पन्ति सदा नित्यं ददामि मनवांछितम् ॥११॥
दधीचानां प्रसादार्थं गोष्ठमांगल्यसन्निधौ ।
प्रादुर्बभौ दधिमती मतिरेषा परात्परा ॥१२॥

इति दधिमथिस्तोत्रम् ॥

326. रामचन्द्रपुष्पाञ्जल्यष्टकम्

॥ श्रीः ॥ अथ श्रीरामचन्द्रपुष्पाञ्जल्यष्टकम् ॥

दशमुखभंजन पापिविगंजन भक्तसुरंजन धर्मपते,
अधिकृतसेतो खगपतिकेतो संसृतिहेतो सत्वमते ।

संसृतिभीतकलौ [सु] विगीते कुशलाधीते धेहि रतिम्,
जय जय हे रघुवंशशिरोवरभूषण पाहि हरे विमतिम् ॥१॥
जनकसुताप्रिय निर्गुण निष्क्रिय सर्वपतत्रिपयानगते,
खण्डितदानव मण्डितमानवपण्डित वा नवगीतनुते ।
भवकधितारण रक्षितवारण विश्वविहारण पश्य नतिम् । जय जय० ॥२॥
दशरथनन्दन दुष्टनिकन्दन परिधृतचन्दनलेप हरे,
खण्डितशिवधनुरगणितगुणजनुरम्बुजरुचितनुरेतु चरे ।
दीनं भावय जगतं पावय रावय दैत्यजनं कुमतिम् । जय जय० ॥३॥
धृतवरभूषण जितखरदूषण सर्वविदूषणनाशकृते,
धृतपीताम्वर कृतवसुधाम्बर नाकवृतां वर सत्यधृते ।
त्वयि धृतचित्ते हृतवरवित्ते ध्वस्तविपत्ते धेहि मतिम् । जय जय० ॥४॥
अयि भवतो भवतो भवतो भवतोऽपरजन्ममृतोविहते,
तव महसो महसो महसो महसो वसवः सततं नियते ।
रारतनो रतनो रतनो रतनोरतनो शुभरूपततिम् । जय जय० ॥५॥
सुररिपुरंगकृतारिविभङ्ग विहङ्गमपुष्पकयानगते,
श्रीमदसङ्गकुरङ्गदृशः सदपाङ्गविलोकनलुब्धमते ।
नीलसरोरुहकान्तियुताङ्ग सुरेशवराङ्ग कृतात्मनतिम् । जय जय० ॥६॥
परिजनसुखकर संसृतिभयहर गरधरसंस्थितिधत्त(र्म)रते,
नरवरतनुधर सकलहृदयचर शरणदुरितहर विवरगते ।
सुमुनिविनुततर निगमकथनपर धर मयि सत्वगुणेश रतिम् । जय जय० ॥७॥
त्वयि मयि भेदलवोऽस्मि न देव तथापि च सेव्यतरोऽस्ति भवान्,
भृत्यजनोऽस्मि विभाति जगत्त्वयि सूक्ष्मतरोऽस्ति तथैव महान्,
दीनतरस्य निषिद्धचरस्य सुमन्दतरस्य विधेहि गतिम् । जय जय० ॥८॥

रामचन्द्रप्रसादाय पुष्पाञ्जल्यष्टकं शुभम् ।
गोपीनाथेन रचितं धृतपुष्पाञ्जलिः पठेत् ॥९॥

इति श्रीदधीचिवंशोद्भवकविश्रीगोपीनाथविरचितं श्रीरामचन्द्रपुष्पाञ्जल्यष्टकं सम्पूर्णम् ॥

329. विश्वनाथविज्ञप्तिपञ्चाशिका

OPENING :

॥ श्रीगणेशाय नमः ॥

ब्रह्मेन्द्रादिभिरर्चिते भवमहापाथोधिपोतोपमे,
कल्याणैकनिकेतनेऽघनिकरप्रोत्सारणंकव्रते ।
भक्त्या सिद्धगणैर्नुते गिरिसुताहस्ताब्जसंलालिते,
विज्ञप्तिः क्रियते पदाम्बुजयुगे देवस्य विश्वेशितुः ॥१

CLOSING :

श्रीमद्राममहीभुजा जयपुराधीशेन निर्मापिता,
शम्भोर्या पदमालिका मृदुपदैर्गानि मया गुम्फिता ।
साऽस्ते मुद्रणमागताऽत्र ललिता स्तुत्यो महेशस्तया,
तोषं याति पुरा यतोऽतिकुशलस्तौर्यत्रिके वर्त्तते ॥४५
भङ्गापानविमत्ततामुपगतः कर्णावुभौ चालयन्,
गण्डोड्डीनषडङ्घ्रिवृन्दमसकृल्लम्बोदरः शुण्डया ।
यज्जम्बूफलविभ्रमं समुपयान् हर्त्तुं प्रवर्त्तेत त-
द्वासं त्वक्त्रपरम्परा विदधती जायेत गौरीपतेः ॥४६॥
एवं मृत्युजिति प्रसादसुमुखे विज्ञप्तिमेनामुमा,
वीणाकोकिलकाकलीस्वरजिता वाचा समावेदयेत् ।
दृष्टे सम्मतिमागते पुररिपौ तां पल्लवे लेखयेत्,
कृत्वा लेखमये महान्नहि पुनस्तस्मात् परावर्त्तते ॥ ७॥
मालीरामसुतो दधीचिकुलजो यः सुन्दरीगर्भतो
जातः काश्यपगोत्र ईशपदयोर्विज्ञप्तिरेषा मुदा ।
येनाकारि स वासमेतु सततं काश्यां विमुक्त्यै सुखम्,
श्रीकण्ठस्य नियोग एष कृपया स्ताल्लेख एतादृशः ॥४८॥
एवं लेखसमुत्सुकः पुरहरः प्रेक्षेत युष्मान् यदा
योगक्षेमविधावुमा सुरसरित् पापौघविद्रावणे ।
स्कन्दो दुष्टनिवारणे गजमुखो विघ्नाटवीपाटने,
नन्द्यानन्दविवृद्धये प्रकटयत्वाशु स्वसत्सम्मतिम् ॥४९॥
युष्मत्संश्रुतसम्मतिः किशलये लेखं विधातुं यदा
गृह्णीयाच्छुभलेखनीं करतले ब्रूतेतियूयं समम् ।

दीनस्यास्य निवार्यतां करुणया सा भैरवीयातना-
प्युक्तौ वो लिपितां करिष्यति दले यद्दानवीरो हरः ।।५०।।
विज्ञप्तिं विनिशम्य मेऽतिसरलैः पद्यैरगूढार्थकैः,
क्लृप्तां पूर्णमनोरथं प्रकुरुतान् मां पार्वतीवल्लभः ।
दूरीकृत्य गृहान्नयन् स्वसविधं काश्यां चिरं वासय-
न्नस्मिन् मोहमृगे करोतु कुतुकी शार्दूलविक्रीडितम् ।।५१
कामदा हि पदाम्भोजेऽर्पितेयं कामदाऽस्तु मे ।
कामदानसमर्थस्य कामदा य(प)त्समुद्धृतिः ।।५२।।
त्रिवेदनन्दशीतांशुवर्षे मार्गे सिते दले ।
एषा पञ्चाशिका पूर्णा दशम्यां सोमवासरे ।।५३।।

COLOPHON : इति श्रीदधीचिवंशोद्भवेन जयपुरीयसंस्कृतपाठशालाध्यापकेन श्रीपण्डित-गोपीनाथशर्मणा निर्मिता श्रीविश्वनाथविज्ञप्तिपञ्चाशिका सम्पूर्त्तिफलम-फलत् ।। शुभम् ।।

Post colophonic : लि० भैर० ।।

351. दधिमथीमहिम्नस्तोत्रम्

OPENING : ।। श्रीगणेशाय नमः ।।

।। अथ दधिमथमहिम्न लिखिते ।। हरिॐ ।।
सुधापारावारोद्भवकनकपङ्केरुहमिदं,
स्फुरत्स्फारस्फीतत्रिदशमधुपास्वादितमधु ।
अनिर्वाच्यं धीश्रीप्रभृतिवरटाजुष्टसुषुमं,
नमन्नित्यश्रीदं दधिमथि भजामस्तव पदम् ।।१

CLOSING : कुर्यात्पाठमनन्यधीः प्रतिदिनं देव्याः महिम्नः पुमान्,
तुष्टा तस्य ददाति सा दधिमथी यद्यन्मनोवाञ्छितम् ।
लोके पूज्यतमो भवेदतिमहाभोगो नताभ्यादतोः (?)
कीर्त्तिः श्रीकुलसन्तति (ती)स्मृतिमती प्राप्नोत्यवश्यं चिरम् ।।३६
हरियुगरुणनामा भूसुपर्वाभिरामो
वरमितदधिमथ्या स्तोत्रमेतद्दध्(दध्यु)दारम् ।

विरचितमुदितेन प्रीतियुक्तेन तेन
भुवि कमिह विदध्याच्छ्रृण्वता पाठकानाम् ।।४०।।
सर्वं खल्विदं ब्रह्मेति श्रुत्या सर्वत्र ब्रह्मता ।
ब्रह्मैव तादृशं यस्मात् सर्वात्मकतयोदितम् ।।४१।।

COLOPHON : इति श्रीहरियुगब्रह्मविरचितायां दधिमथोमहिम्नस्तोत्र सम्पूर्णम् ।।

352. दामोदरनोराजनस्तोत्रम्

।। श्रीगरणेशाय नमः ।।

।। अथ दामोदरनीराजनस्तोत्रम् ।।

श्रीदामोदर सुरवर जयसुखकन्द हरे,
जय जय जय संसाराम्बुधितरणैकतरे ।
जय गोपीजनवल्लभ हृतजनितापतते,
जय जय कंसविनाशन जय सुरवृन्दपते जय०
जय जय गरुडगते ।।१।।
जय कुटिलालकमण्डितमुखवारिज सुमते
मुकुटामण्डितमस्तक अधराहितवेणो ।।२।।
जय वृन्दावनभूतलबन्दीकृतरेणो (ध्रु)
जय पीतवसनमण्डितकटितट तव चरणौ
वन्दे कानककटकौ मंजीराभरणौ,
यस्तव रूपं पश्यति निवसति किमु धरणौ
नहि लब्ध्वाऽपि निवासं यात्य ¨ तरणौ ।।२।।जय०।।
परिहृतरागमहाजनमानसहंस सताम्,
दारितदुरितसमूहः परिहर मम ममताम् ।
कृपया देव निवेशय बुद्धौ समसमताम्,
नित्यं हृदयसरोजे करुणाकर रमताम् ।।३।।जय०।।
जय गोपवधूभिः सह सौरतकर्मरते
जय राधालिङ्गनरतमत्तद्विरदगते ।
नित्यं चित्ते निवसतु मम तव विमलतनुः,
स्यतु पुनरागमनप्रदमलिनं कृष्णतनुः ।।४।। जय०।।

सुरवृन्देषु नितान्तं त्वं विलससि सेरो,
गोपीमण्डलमालापरिमण्डनमेरो ।
जय जय नरपतिकुलवरयादवकुलकेतो,
लोकानामतिसर्जनरक्षाहृतिहेतो ।।५।।
अय्यर्जुनकृतमैत्रीकृतसारथिकर्मन्,
शन्तनुसुतदृढभक्त्या परिहृतनिजधर्मन् ।
जय जय रक्षःस्त्रीसुतमानध्वंस सदा
बुद्धिश्चलति यदा मम देव नियच्छ तदा ।।६।।
अयि कुन्तीसुतवाचा त्वं दौत्येऽयासी-
र्युध्वा जाम्बवता सह रत्नं तमरासीः ।
वैकुण्ठाधिप वन्दे तव चरणसरोजं
ध्याये दधतं चक्रं शङ्खगदाम्भोजम् ।।७।।
कमलाविलसितवक्षो जय वैकुण्ठपते,
जय सुरगणकृतनुतिततिधृतपरिचित्तरते ।
तव चरणं शरणमितो हर यमदूतभयम्,
केशव संसृतितो मम देव विधेहि जयम् ।।८।।
गोपीनाथविरचितं प्रपठति धृतधरणे,
स्तोत्रमिदं स न लभते लोके जनिमरणे ।
भोगानवनौ भुक्त्वा याति स विष्णुपदम्,
कृतकृत्यत्वं लभते हृत्वा जन्मगदम् ।।९।।
दासुदेव सुराधीश ब्रह्मादिनुत लोकप ।
इदं **नीराजनस्तोत्रं** श्रुत्वा प्रीतो भव प्रभो ।।१०।।
इति श्री**गोपीनाथ**विरचितं **हरिनीराजनस्तोत्रं** सम्पूर्णम् ।।

406. कुमारसम्भव 'काव्यार्थप्रकाशिका' टीका

OPENING :

।। श्रीरामोविजयते ।।

श्रीमन्मदनगोपालं नत्वा तत्त्वार्थदीपकम् ।
सर्वविघ्नापहर्त्तारं दातारं सुखसम्पदाम् ।।१।।
विष्णुदासतनूजेन हरिदासेन धीमता ।
कुमारका[व्यस्य]क्रियते यथावुद्धच[द्धि]प्रदीपिका ।।२।।

तत्र भवान् कालिदासः कुमारसम्भवं चिकीर्षुः वस्तुनिर्देशरूपं मङ्गलमाचरति-अस्तीति, उत्तरस्यां दिशि हिमालयो नाम नगाधिराजः अस्ति वर्त्तते। अधिको राजा अधिराजः, राजाहःसखिभ्यष्टच्।

CLOSING : शुश्रांचक्रे ॥ कथंभूता सा वेदिसन्मार्ज्जनदक्षा वेद्याः देवसमाधिवेदिकायाः। सन्मार्गे सन्मार्ज्जने दक्षाः प्रवणाः। इत्यादि-

COLOPHON : इति श्रीमन्महोदारान्तःकरणपरमपण्डितविष्णुदा[सा]त्मज-हरिदास पण्डितविरचितायां कुमारसम्भवकाव्यार्थप्रकाशिकायां प्रथमः सर्गः ॥१॥ श्री॥ श्रीनृसिंहाय नमः ॥ श्रीहयग्रीवाय नमः ॥ श्रीगणेशाय नमः ॥

425. आनन्दनन्दनकाव्यम्

OPENING : ॥ श्रीकृष्णाय नमः ॥

श्रीकृष्णं कमलाकान्तं कमलायतलोचनम्।
कालिन्दीकमले कामं क्रीडन्तं सततं श्रये ॥१॥
सुमनोभिः सुमनोभिः सुमनोभिः सेव्यमानपादयुगम्।
कलिकल्मषकुलविघ्ननिघ्नं भक्तेर्भजाम्यहं कृष्णम् ॥२॥
रुद्राणामहमस्मि शङ्कर इति श्रीकृष्णवाक्यादहं,
बुद्धवा कृष्णमुमापतिं निलयनं वृन्दावनं प्रार्थये।
भक्तिर्न व्यभिचारिणी यत इयं ज्ञेया हरप्रार्थने,
गौरीयं वृषभानुजा किमपरं कृष्णान्न तत्वं परम् ॥३

CLOSING : ॥ स्त्री० न० ॥ (स्त्री-नपुंसकलिङ्ग)

हरिचन्दनवाटिका मयेयं निहिता कृष्णपदारविन्दयुग्मे।
इह कीर्त्तिममुत्र मुक्तिमन्तर्हृदये श्रीपतिवासमातनोतु ॥११०॥
आनन्दनन्दनमिदं विबुधामोदप्रदं मया रचितम्।
पीयूपकुल्ययाऽदः सेक्ष्यति नारायणः कोऽपि ॥१११॥
दाधीचः काश्यपेऽभूज्जयपुरवसतिर्नन्दरामाभिधानो
मालीरामः सुतोऽस्याभवदमलमतिस्तस्य चास्तां सुतौ द्वौ।
गङ्गाविष्णुः पुरोऽभूद्धरिरतिरवरो ब्रह्मवित् कृष्णभक्तो
गोपीनाथाभिधो यो व्यरचयदमितानन्ददं ग्रन्थमेनम् ॥११२॥

इषकृष्णदले षष्ठ्यां गुरावानन्दनन्दनम् ।
जातं जानन्तु विद्वांसो वेदाब्ध्यङ्कसुधाकरे ।।११३।।

इति श्रीकृष्णचरणारविन्दामन्दमकरन्दास्वादमिलिन्दीकृतमानसेन श्रीदधीचिवंशोद्भवनन्दरामात्मजमालीरामनन्दनेन श्रीगोपीनाथेन विरचित आनन्दनन्दने हरिचन्दनवाटिका पूर्त्तिमगात् ।।५।। समाप्तोऽयं ग्रन्थः ।। शुभम् ।।

The upper folio of the Ms. bears the following Note—

"अमरकोशोदाहरणरूपमिदम् । अथानन्दनन्दनं काव्यं पञ्चवाटिकं प्रारभ्यते । इदं पुस्तकं पण्डितगोपीनाथेन स्वकृते स्वयं लिख्यते ।
तत्प० सं० ६५"

434. यशस्वत्प्रतापप्रशस्तिः

OPENING : ।। श्रीः ।। श्रीयशस्वत्प्रशस्तिः ।।

भोजाद्याः पृथिवीपालाः कर्णाकर्णि श्रुता मया ।
श्रीमद्यशस्वत्सदृशो नृपो नाऽलक्षि भूतले ।।१।।
यावद्धराधरधरां धरां धरति मस्तके ।
शेषस्तावद्यशोलोके तिष्ठतादस्य भूपतेः ।।२।।
यशस्वत्सुयशःपूरविमले जगतां भये ।
विहाय शत्रुवक्त्राणि श्यामत्वं नोपलभ्यते ।।३।।

CLOSING : शूरैर्लब्धयशश्च यैर्नहि पुनर्भिन्नैस्तथा भेदकैः,
सोऽयं साप्तपदीनमाचरति न भ्रेषं च कल्पात्पथः ।
नाऽदत्तेऽनभिनीतमण्वपि धनं लभ्यं च न प्रोज्झति,
प्रोत्सृष्टाखिलकायथो विजयते श्रीमान् प्रतापाह्वयः ।।२४।।
दानेन केऽपि दयया कति केऽपि धारा-
तीर्थे निपात्य तनुमायुरुदग्रकीर्त्तिम् ।
वाणी न चेत् कविकुले स्थितिमाचरिष्य-
त्तत्तद्यशो न धरणौ स्थिरतामुपैष्यत् ।।२५।।
जातो दाधीचवंशे जयपुरवसतिः काव्यवेदान्तवेत्ता,
गोपीनाथाभिधानो नृपतिकुलमणेः श्रीयशस्वन्नृपस्य ।

निर्मायेमां प्रशस्तिं नृपगुणकलितां कल्पयित्वोपहारं,
दीर्घायुः पुत्रपौत्रैः सुखमनुभवतादाशिषं सम्प्रयुंक्ते ॥२६॥

439. शृङ्गारशतकम्

OPENING : ... ख्यातुं स्मितमुखश(स) खीदत्तनयना,
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः॥४२॥
नापेतोनुनयेन यः प्रियसुहृद्वाक्यैर्न यः संहृतो
यो दीर्घं दिवसं विषह्य विषमं यत्नात् कथंचिद्धृतः ।
अन्योन्यस्य हृते मुखे निहितयोस्तिर्य्यक्कथंचिद् दृशोः,
स द्वाभ्यामिति विस्मृतव्यतिकरो मानो विहस्योज्झितः ।

CLOSING : म्लानं यद्वदनाम्बुजं विलुलिता यद्दोर्म(मृ)णालीलता
शुष्कः सम्प्रति मा निशा प्रियतमे यामीति दुर्भाविते ।
नानादुःखवियोगचन्द्रकिरणप्रौढप्रतापोदय-
स्तन्नामास्ति तमत्र चित्रमथ कं फुल्लं यदक्षोत्पलम् ॥११३॥

COLOPHON : इत्यमरसिंहकृतौ शृङ्गारशतकं समाप्तमिति भद्रम् ॥

Post-colophonic : संवत्सरभूवसुशून्यकृतौ चन्द्रे सम्मानके किल ।
इदं च लिखितं च काव्यं शिष्यो बुधस्य च सतः,
भावदेवसूरेः आह्वेन.....देवकामिप्रियं बुधाय ॥१॥
पञ्चाननो ज्ञानगज(:) चिरं जीवतु मे गुरुः ।
यस्य.........भक्त्ते एते वर्णसमुच्चयाः ॥२॥
पं० भगवतीदासविद्यावेदालंकारज्ञापकाय गुरवे नमः ॥

442. सुतजन्मोत्सवः

OPENING : आसीद्भास्करतो मनुर्वसुमतीनाथाग्रगण्यः पुरा,
श्रीवैवस्वतनामधेयविदितो दीप्त्या पितेवोज्ज्वलः ।
शास्त्रं मानवनाम येन रचितं सद्राजधर्मान्वितं,
यत्संश्रित्य जयन्ति भूपतिगणा लोकद्वयीं धर्मतः ॥१
तद्वंशेऽवततार सर्वजगतामीशः स्वराण्माधवो-
भूपात्पंक्तिरथादपङ्किलमनोवृत्तेर्महाविक्रमात् ।

कौशल्याशुभगर्भतः शुचिसचिः श्रीरामचन्द्राभिधो
भूपान्बोधयति स्म यो नयसृतिं सच्छ्लाघया चर्य्यया ॥२

CLOSIN   तर्क्के कारणगा गुणा निगदिताः कार्ये गुणारम्भकाः,
तेनाऽसौ जनकस्थसद्गुणयुतो भावीति काशीरियम् ।
भूपालोऽजितसिंह एष महिषी चाँपावती द्वाविमौ,
सत्पुत्रेण सुखान्वितौ शतसमा राज्यास्पदे राजताम् ॥५७
पूर्वमजितनृपसौधे जयपुरसविधे समुत्सवो जातः ।
पश्चाद्धरिसिंहगृहे दृष्ट्वा सफलीकृता दृष्टिः ॥५८॥
गोपीनाथेन रचितः सुतजन्ममहोत्सवः ।
उभयोर्नृ पदम्पत्योः सुखदो जायतां भृशम् ॥५६॥
नन्दवेदाङ्कभूवर्षे माघस्य विशदे दले ।
बुधवासरसंयुक्ते पूर्णिमासञ्ज्ञके तिथौ ॥६०॥
श्रीयुक्ताजितभूपालसुतजन्ममहोत्सवः ।
गोपीनाथकृतो भूयात् सर्वलोकसुखावहः ॥६१॥

॥ मङ्गलं भवतात् सदा ॥

444. प्रबोधचन्द्रोदयनाटकं सटीकम्

OPENING (W.) ;

॥ श्रीगणेशाय नमः ॥

मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः,
खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति ।
यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमम्,
सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधो महः ॥१॥

OPENING (Ct.) :

॥ श्रीगणेशाय नमः ॥

रामं विनायकं वन्दे सदानन्दं गुणाकरम् ।
संसारतापसंहारकारणं विघ्नवारणम् ॥१॥

अथ कथमप्यन्तेवासिनं बहुशोऽध्यापितवेदान्तसिद्धान्तमपि तत्त्वावबोध-पराङ्मुखं नाटकादिरसिकाः परमकारुणिकाः श्रीकृष्णमिश्राः प्रबोधचन्द्रोदया-ख्यनाटकव्याजेन तं बुबोधयिषवस्तद्रचयन्ति स्म । तत्राद्यपद्यद्वये नान्दीसंज्ञके निर्विघ्नपरिसमाप्तये कृतं मङ्गलं निबध्नाति मध्याह्नेति ।

W. closing & & colophon :

तथाप्येतदस्तु ।

पर्ज्जन्योऽस्मिन् जगति महतीं वृष्टिमिष्टां विधत्ताम्,

राजानः क्ष्मां गलितविषयोपप्लवाः पालयन्तु ।

तत्त्वोन्मेषादपहततमसस्त्वत्प्रसादान्महान्तः,

संसाराब्धिं विषयममतातङ्क-पङ्कं तरन्तु ॥३३॥

तथास्त्विति निष्क्रान्ताः सर्वे । समाप्तोऽयं षष्ठोऽङ्कः ॥६॥ इति **श्रीकृष्ण-मिश्रविरचितं प्रबोधचन्द्रोदयं नाटकं** समाप्तिमगात् ॥६॥

आसोद्भावोपनामा भुवि विदितयशा **रामकृष्णो**ऽतिविज्ञः,

तस्माद् **गौर्या** विनीतो विविधगुणनिधि**विश्वनाथो**ऽवतीर्णः ।

तस्माद् विख्यातकीर्त्तेर्विविधमखकृतः प्रादुरासीद्भवान्यां,

श्रीमत्यां यो **गणेशो** भुवि विदितगुणा तस्य **चिच्चन्द्रिकास्तु** ॥

न प्राकृतं त्यक्तमिहास्ति किञ्चिन्मयेति सन्तः श्रुतिगोचरं वः ।

करोमि तेनास्तु निरङ्कुशेयं **चिच्चन्द्रिका**नन्दविबोधनाय ॥

ज्ञानतोऽज्ञानतो वापि सुष्ठुराऽसुष्ठु यत्कृतम् ।

तद्वो क्षमध्वं सद्वृत्ताः परीक्षयत सादरम् ॥१

इति श्रीभावविश्वनाथदीक्षितसूनुगणेशविरचितायां **प्रबोधचन्द्रोदयीय-चिच्चन्द्रिका** [यां]षष्ठोऽङ्कः समाप्तिमगमत् ॥श्रीः॥

446 . माधवस्वातन्त्र्यम्

OPENING :

॥ प्रथमोऽङ्कः ॥

॥ नान्दी ॥

शिखिफणिगोपश्वास्यान् सुरसरितं गिरिसुतां च सन्नीत्या ।

निर्वहति यो महेशो मनोरथस्याप्तये स स्तात् ॥१

अपि च—

लोकत्रयस्य कर्त्ता भक्तानां पापवृन्दसंहर्त्ता ।

गोवर्द्धनगिरिधर्त्ता खगपतिसर्त्ता हरिः शरणम् ॥२

नान्द्यन्ते—

सूत्रधारः । अलमतिविस्तरेण । आज्ञप्तोऽस्मि शास्त्रकान्तारश्रान्त-धीभिः सुधीभिः । यत्—

शास्त्रकान्तारसञ्चारश्रान्तस्य मनसो मुदे
अभिनेया नवाऽत्राऽद्य **गोपीनाथ**कवेः कृतिः ॥३॥इति।

CLOSING : प्रोत्थानेन सुसत्कृतः स्वसविधे स्थातुं पदं कल्पितम्,
वित्तं तावददायि यन्न मनसा स्वप्नेऽपि सङ्कल्पितम् ।
ग्रामाश्चोर्व्वरमेदिनीविलसिताः प्रीत्या वितीर्णास्तथा,
मुख्यामात्यपदं गतोऽस्मि न पुनर्मत्प्रार्थनोपेक्ष्यते ॥३२॥
अतः परमपि प्रियमस्ति । तथापीदमस्तु । भरतवाक्यम्—
श्रीगोपालपदाम्बुजेऽत्र भवतो भक्तिः परा जायताम्,
रक्षन्तु क्षितिमण्डलं क्षितिभुजश्चिन्वन्तु नीत्या यशः ।
विद्वांसोऽनुभवन्त्विमामभिनयैः प्रत्यक्षलक्ष्यीकृताम्,
गोपीनाथकवेः कृतिर्वितनुतामेषा मुदं मन्त्रिणाम् ॥३३॥
॥ इति निष्क्रान्ताः सर्वे ॥
॥ सप्तमोऽङ्कः ॥

COLOPHON : इति श्रीकृष्णचरणारविन्दामन्दमकरन्दास्वादमिलिन्दीकृत ....
...................दधीचिवंशोद्भवेन..................।

451. सिंहासनद्वात्रिंशिका

OPENING : ॥ सिधि श्रीगणे[शा]य नमः ॥

या कुन्देन्दुतुषारहारधवला या रक्तपद्मासना,
या वीणावरदण्डमण्डितकरा या स्वेतवस्त्रावृता ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता,
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥१॥
॥१॥ श्रीसिंहासनद्वात्रिंशिका प्रारभ्यते ॥

श्रीअवन्तिदेशे एकस्मिन् ग्रामे विप्रो वसति । तेन वर्षाकाले कर्षणं कृतम् । युगन्धरी उद्गता । क्रमेण ववृधे ।

तत राजा प्राह । नाहं यात्रां कुर्वे च मे केनापि प्रयोजनम् । ततस्ताः प्राहुः । भो श्रीभोज यः कश्चिदेतद् विक्रमादित्य चरित्रं पवित्रं देवाङ्गनासंवादसुन्दरं पठिष्यति, वाचयिष्यति, श्रोष्यति, समाचरिष्यति तस्य धृतिकीर्त्ति-

CLOSING : लक्ष्मीसौख्यावाप्तिर्भविष्यति । इति वरं दत्वा देवाङ्गना जग्मुः । श्रीभोजराजस्तु जलधिमेखलायामिलायामखण्डशासनश्चिरं रराज राज्यलक्ष्म्या ।

।। इति श्रीविक्रमादित्यद्वात्रिंशिका समाप्ता ।।

श्रीविक्रमादित्यनरेश्वरस्य चरित्रमेतत्कविभिर्निबद्धम् ।
पुरा महाराष्ट्रवरिष्ठभाषामयं महाश्चर्यकरं नराणाम् ।।
क्षेमङ्करेण मुनिना वरपद्यगद्यबंधेन युक्तिकृतसंस्कृतवन्धुरेण ।
विश्वोपकारविलसद्गुणकीर्त्तनाय चक्रे चिरादमरपाण्डतहर्षहेतुः ।।

Post-Oolophonic : संवत् १७०७ मार्गशिर वदि ३० अमावास्यां भौबुधवासरान्वितायां लिषितं मिश्रतुलसीरामेण स्वार्थं वा परोपकारार्थं वा ।

याद्दशं पुस्तकं द्दष्टं ताद्दश लिषितं मया ।
यदि सुद्धमसुद्धं वा मम दोषो न दीयते ।।१।।
भग्नपृष्ठकटिग्रीव(वो)वंधु(बद्ध)मुष्टिरधोमुखः ।
कष्टेन लिष्यते ग्रन्थ(न्थो)जत्नेन परिपालयेत् ।।श्री।।
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेत्सिथलबंधनात् ।
मूर्षहस्ते न दातव्यमेवं वदति पुस्तकः ।।
शुभं ददात् ।।लेषकपाठकयो।।

452. चत्वारिंशत्पद्यावली :

OPENING : ।। श्रीगणेशाय नमः ।।

।। अथ सरूपनारायणस्य वर्णनम् ।।

गणपतिमतिसुन्दराङ्गमीशं भजदभयप्रदमम्बिकात्मजं तम् ।
सकलसुरनिकायवन्द्यमानं जगदुदयस्थितिभङ्गहेतुमीडे ।।१।।
शशिविशदयश.परम्पराभिर्जगदखिलं भृशमुज्ज्वलं प्रकुर्वन् ।
वितरणरसिकः सरूपनारायण उदयं परिपूर्णमेतु नित्यम् ।।२।।

CLOSING : कपोलयुगलश्र(स्र)वन्मदसुगन्धलोभाकुल-
भ्रमद्भ्रमरझङ्कृतिश्रवणहर्षरोमाञ्चिते ।
वृषध्वजसुते मतंगजमुखे त्वदीयं मनः,
प्रतिक्षणमतीव खेलतु सरूपनारायणः ।।३३

प्रथमं निर्मिताः श्लोकाः ७ मु० ४०

COLOPHON : इति श्रीश्रीकृष्णरामकविकृते श्रीमत्सरूपनारायणवर्णने चत्वारिंशत्पद्यावली पूर्तिमगमत् ॥१॥

Post-Colophonic - मोती चैत्रशुक्लपूर्णिमा सं० १९३१ का ॥श्रीरस्तु॥

492. वृत्तचिन्तामणिः

OPENING : ॥ श्रीगणेशाय नमः ॥ अथ वृत्तचिंतामणिर्लिख्यते ॥

अहीनां मालां यो वहति च गले पीतवसनो,
विधत्ते यो गंगां कलिभुजगहा चंद्रविलसन् ।
... याधीनो दक्षो मदनमदविध्वंसनविधौ,
हरश्च श्रीकांतो मम परमभूत्यै प्रभवताम् ॥१॥
जातो दाधीचवंशे द्विजकुलतिलके काश्यपे गोत्रवर्ये,
सत्सर्वे शुद्धबुद्धिर्गुरुपदकृपया लब्धविद्याप्रसादः ।
सद्बोधाद् ध्वस्तबंधो जयपुरवसतिः काव्यनिर्माणदक्षो,
गोपीनाथाभिधोयं विरचयति बुधप्रीतये ग्रन्थमेनम् ॥२॥
वृत्तचिंतामणिर्नाम्ना ख्यातो भवतु भूतले ।
भविताऽभ्यस्यमानोऽयं सभायां जयदो ध्रुवम् ॥३॥

CLOSING :

अथ दोहा-मर्कटी—

यदा कुर्यान्निरो विद्वान्मात्रावृत्तस्य मर्क्कटीम् ।
योग्यानां गलवर्णांश्च कलाः शीर्षो(र्षे)नियोजयेत् ॥६६॥
शून्यपूर्वस्थितं गाङ्कं हत्वा योग्यगणेन च ।
भेदांकं शून्यपूर्वस्थं योग्यगांकेन मर्दयेत् ॥६७॥
सिद्धमंकद्वयं युक्त्या गुरुपंक्तिं प्रपूरयेत् ।
अन्याः प्रपूरयेदेवं पंक्तीः सर्वा विचक्षणः ॥६८॥
पिंगलोक्तिमवगम्य संविदा प्रत्ययाऽष्टकमिदं विनिर्मितम् ।
यन्मयाऽत्र लिखितः प्रमादतः शोधनीयमिह तत्सुपण्डितैः ॥६९॥

COLOPHON : इति श्रीदधीचिवंशोद्भवकविश्रीगोपीनाथकृते वृत्तचिन्तामणौ आर्यादोहाष्टप्रत्ययनिरूपणो नाम तृतीयः प्रकाशः ॥३॥

502. काव्यकौस्तुभः

OPENING : ।। श्रीराधाकान्ताय नमः ।।

कलाभिर्निभृतः श्रीमान् राधया समलङ्कृतः ।
दीव्यत्कुवलयः सोऽय विधुर्विजयतेतराम् ।।१

प्रारिप्सितस्यास्य शास्त्रस्य काव्याङ्गत्वात्काव्यफलमेव फलमिति तावदाह—'कीर्त्तिः सार्वज्ञमानन्दो धनादीनि च काव्यतः,।

CLOSING : तथा क्रमेणोदाहरणम्—

'विप्रोऽयं सर्ववद्दीप्तोदधिबिन्दुनिभोऽधिकः' ।

अत्र जात्या प्रमाणेन च न्यूनता ।

'दीर्घायुर्द्रौणिवत्काको वेणीयं यमुनोपमा'

अत्र जात्या प्रमाणेन चाधिक्यम् ।

नवप्रभः सम्प्रति काव्यकौस्तुभः प्रभाति विद्यैकविभूषणेन यः ।
आलोकतस्तस्य जनैः सुबुद्धिभिः परीक्षि(क्ष्य)तामेष नु काव्यपूरुषः ।।१।।
विद्याभूषणगदितं गदितं काव्यकौस्तुभं बिभ्रत् ।
तिष्ठति यदि कमनीयो नमनीयोऽसौ न किं सदसि ।।२।।

COLOPHON : इति काव्यकौस्तुभे शब्दार्थालङ्कारनिर्णयो नवमो प्रभा ।।६।। श्रीहरिः श्रीः ।। श्रीः ।। श्रीः ।। श्रीः ।। श्रीः ।। श्रीः ।। श्रीः ।। श्रीः ।।

505. काव्यप्रदीपकम्

OPENING : ।। श्रीगणेशाय नमः ।।

सोनोदेव्याः प्रथमतनयः केशवस्यात्मजन्मा,
श्रीगोविन्दो रुचिकरकवेः स्नेहपात्रं कनीयान् ।
श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं(त्ते),
नत्वा सारस्वतमपि महः काव्यतत्त्वं व्यनक्ति ।।१।।

वचनसन्दर्भविशेषरूपस्य ग्रन्थस्य प्रारिप्सितत्वेन स्तोतुमुचितायाः सेव्यमानायाश्च वाग्देव्या आस्पदभूतां कविभारतीं तदभिन्नत्वेनाध्यवसितां प्रारिप्सितप्रतिबन्धकदुरितशान्तये ग्रन्थकृत् संस्तौति ।

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।।१।।

Colophon- (on f. 18 a) इति श्रीमहामहोपाध्यायश्रीगोविन्दकृते काव्यप्रदीपे अर्थव्यञ्जकतानिर्णयस्तृतीय उल्लासः ।

CLOSING : 'शब्दार्थोभयशक्त्यर्थस्त्रिधा स कथितो ध्वनिः ।'

घण्टायां हन्यमानायां मुख्यशब्दानन्तरं यत्क्षोदीयानपरोऽनुरणनरूपः शब्दः प्रतीयते तद्वत्संलक्ष्यक्रमा व्यंग्यस्य स्थितिर्यत्र सः शब्दश्चार्थश्चोभयं चेति द्वन्द्वः, तेन शब्दशक्तिमूलव्यंग्यः, अर्थशक्तिमूलव्यंग्यः, उभयशक्तिमूलव्यंग्यश्चेति त्रिधेत्यर्थः । शब्दशक्तिमूलत्वं चैतदेव यत्तेनैव शब्दे तदर्थप्रतीतिर्न तु पर्य्यायान्तरेणापि । एतद्वैपरीत्यं चार्थशक्तिमूलत्वं नत्वभिधया तत्प्रतीतिरिति । एतेनाभिधाया यत्र न नियमनं तत्रैष भेदो द्रष्टव्यः । तन्नियमने तु नाभिधामूलत्वं किन्तु व्यञ्जनामूलत्वमेव भद्रात्मन इतिवद्भवेदिति यत्केनचिदुक्तं तन्नादेयम् .... ।

506. काव्यामृतम्

OPENING : ।। श्रीगणेशाय नमः ।।

कमपि प्रबन्धमन्धं करणमलङ्कारदत्तचित्तानाम् ।
तोषाय तार्किकाणां करवै खरवैरिणं नत्वा ।।१।।
पररचितकाव्यकण्टकखण्डनशतताण्डवं कुर्मः ।
कवयोऽद्य दुर्दुरूढाः स्वैरं खेलन्तु काव्यगहनेषु ।।२।।

तत्रादावनुवादपूर्वकं काव्यप्रकाशखण्डनमारभ्यते—

'नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।।१

नियतिरदृष्टं तत्कृतो नियमस्तद्रहितामित्यर्थः । अत एवोक्तम्—

'अपारे काव्यसंसारे कविरेकः प्रतिष्ठितः ।
यथास्मै रोचते विश्वं तथैव परिकल्पयेत् ।।

इत्ययमर्थो नः साधुः । काव्ये नियमस्य सत्वात् शब्दे छन्दःप्रभृतिषु । तथा च तत्तद्रसविशेषे, तत्तद्रीतिविशेषे, तत्तत्प्रबन्धे भाषाविशेषे च नियमस्य सत्वात् । अर्थेऽपि मुखादिकं चन्द्रत्वादिनैव वर्ण्यते नान्येनेति नियमस्य सत्वात् ।

CLOSING : स्निग्धः श्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः ।
कामं सन्तु दृढं कठोरहृदये रामोऽस्मि सर्वंसहे,
वैदेही तु कथं भविष्यति हहाहा देवि धीरा भव ॥

अत्र लिप्ते तु पयोदसुहृदामिति वात्यन्ततिरस्कृतिवाचकयोः संसृष्टिः । 'आभ्यां सह रामोऽस्मि' इति अर्थान्तरसंक्रमितवाच्यस्यान्यानुग्राह्यानुग्राहक-भावेन रामपदलक्षणैकव्यंजकानुप्रवेशे न चार्थांतरसंक्रमितरसध्वन्योश्च संकर इति काव्यामृते तृतीयोल्लासः । अथ परोक्तगुणीभूतव्यंग्यस्याभेद ...।

508. चित्रमीमांसा

OPENING : ॥ अथोपमेयोपमा निरूप्यते ॥

उपमानोपमेयत्वं द्वयोः पर्य्यायतो यदि ।
उपमेयोपमा सा स्याद् द्विविधैषा प्रकीर्त्तिता ॥

यदि द्वयोर्यद्वर्ण्यते सोपमेयोपमा इत्युच्येत तदा तुल्ययोगितायामति-व्याप्तिः । तत्र—

जनस्य तस्मिन् समये विगाढं बभूवतुर्द्वौ सविशेषकान्तौ ।
तापापनोदक्षमपादसेवौ स चोदयस्थो नृपतिः शशी च ॥

इति यद्द्वयोर्नृपशशिनोयुगपदेकधर्मान्वयवर्णनादतः पर्य्यायेणेत्युक्तम् ।

CLOSING : यदि तु हेतुमता सह हेतोरभिधानं भेदतो हेतुरिति मतान्तराश्रयणेन तत्र हेत्वलंकारो न रूपकमित्यभ्युपगम्येत; तदारोपविषयस्य स्यादिति पूर्वोदाहृत-लक्षणस्य तत्रातिव्याप्तिः । एवमुपमै(मा) तिरोभूतभेदारूपकमिष्यते । रूपकं तदभेदो यदुपमानोपमेययोरित्यादिलक्षणेष्वप्यतिव्याप्त्यादिदोषा यथासम्भव-मुन्नेयाः । अत्र वदामः ।

बिम्बाऽविशिष्टे निर्दिष्टे विषये यद्यनिह्नुते ।
उपरञ्जकतामेति विषयीरूपकं तदा ॥
बिम्बा....... .. ..

509 पण्डितकरभिन्दिपालः

OPENING : ॥ श्रीकृष्णाय नमः ॥

विविधेषु विविधफलदः शिवादिरूपैः सदा त्वयं त्वगुणः ।
भक्तेषु निर्गुणत्वं कुर्वन् हरिरुत्तमो जयति ॥१॥
ननु कुत एतदेव गम्यते सर्ववेदेतिहाससारभूतानसकलप्रमाणाविरुद्धात्
श्रीभागवतान्महापुराणादिति ब्रूमः। कथं उच्यते । दशमस्कन्धे—
देवासुरमनुष्येषु ये भजन्त्यशिवं शिवम् ।
प्रायस्ते धनिनो भो जानंतु लक्ष्म्याः पतिं हरिम् ॥
इत्यादिना भजनीयप्रभुस्वभावविरुद्धाया भजद्भूतेः कारणे राज्ञा
पृष्टे शुकेन ।
शिवः शक्तिः पुनः शश्वत् त्रिलिङ्गो गुणसंवृतः ।
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥

CLOSING गणपतेरपि त्रिगुणात्मकत्वमेव गणपतितापिन्यां प्रतिपादितम्—
स संस्तुतो दैवतं देवसूनुः सूनुं भृगोर्वाक्यमुवाच तुष्टः ।
अवेहि मां भार्गववक्रतुण्डमनाथनाथं त्रिगुणात्मकं शिवम् ॥
इति मंत्रेण, अतो न क्वापि विवादलेश इति दिक् ।
इति श्रीवल्लभाचार्यविट्ठलेशपदाब्जयोः ।
दासस्तत्कृपयैवेद निर्ममे पुरुषोत्तमः ॥१॥
दुर्द्विजसमाजसंकुलनिगमक्षेत्रालिरक्षणायालम् ॥
आदाय भिंडिपालं सन्तो गुलिकाः सुखादजतः ॥
इति युक्तिसूक्तवचनप्रचण्डकिरणप्रकाशितां सरणिम् ।
प्राप्यासदुक्तिकण्टकपरिहारं सर्वं एव रचयन्तु ॥३॥
यदि स्फुरति दूषणं निपुणबुद्धयः सर्वथा ।
मदीयवचसि स्फुटं तदपि युक्तिभिदेपि ताम् ॥
विचारभरचातुरीफलमिदं हि लोके यतः
समाधिकुशलस्य तद्भवतु चापि कौतूहलम् ॥

COLOPHON : इति श्रीवल्लभनन्दनचरणैकतानपीताम्बरतनुजपुरुषोत्तमविरचितः
पण्डितकरभिं-पालः सम्पूर्णः ॥छ॥ छ ॥ छ ॥ छ॥ श्री ॥ श्री ॥ श्री ॥ श्री

OPENING : **509. बन्धकौमुदी**

।। श्रीगणेशाय नमः ।।

नमस्तस्मै नृहरये संसारार्णवसेतवे ।
भक्तिनम्रांजनानन्दसंदो ¨ घिहेतवे ।।१।।
केषांचिदिह बंधानां लक्ष्यदृष्टानुसारतः ।
लक्षणं श्लक्ष्णमस्माभिर्गद्येनैवाभिधीयते ।।२।।
सप्रस्तारा स्फुटार्थेयं बालबोधविवृद्धये ।
यथामति नृसिंहेन क्रियते बन्धकौमुदी ।।३।।

तत्रादौ पद्मबन्धे सर्वंपदाद्यो वर्णः स एवान्त्यः तथा श्लोकप्रथमपादादौ अन्त्यवर्णपदान्ते च वर्णत्रयम् गतागतं तथा द्वितीयपादान्ते चतुर्थपादादौ च वर्णत्रयं गतागतं, एवं चेत् पद्मबन्धः । यथा—

वरतात महादेव वदेहान्तेऽतनो शिवः ।
वशिनो लोकपालाव बलापाक्नन्तारऽव ।।१।।

COLOPHON : हरबन्धोयम्—

सतामेव वर्गे नृदेवाभवत्ते समस्तस्पृहाहंतृ राज्यं च जन्म ।
वतेतेन देवेश वेशं वपुः श्रीगुरुत्वं मृषोहे न तत्त्वं प्रमत्तम् ।।
प्रमत्तं न तत्त्वं मृषो हे गुरुत्वं वपुः श्रीशवेशं न देवे वतेते !
च जन्म त्रिराज्यं स्पृहाहंसमस्त भवत्ते नृदेवाव वर्गे सतामे ।।१।।

514. भरतसूत्रं लक्षणचन्द्रिकाञ्चितम्

COLOPHON :

।। श्रीः ।। नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।।१।।
काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृ तये कान्तासम्मिततयोपदेशयुजे ।।२।।

(Ct.) : ।। श्रीगणेशाय नमः ।।

प्रणम्य पितरौ वाचां देवीं गुरुपदाम्बुजम् ।
भारतीं कारिकाः सर्वा विवृणोमि यथामति ।।१।।

प्रथमं तावत्परमकारुणिको भरतो नाम महामुनिः सुकुमारमतीन् राजकुमारान् गहनतरशास्त्रमार्गे गुडजिह्विकया प्रवर्त्तयितुमतिसुकुमारशास्त्रं कारिकाभिः प्रणेष्यन् चिकीर्षितनिर्विघ्नपरिसमाप्तिकामः शिष्टाचारानुमित-श्रुतिबोधितकर्त्तव्यताकं समुचितेष्टदेवतानमस्कारलक्षणं मङ्गलमाद्यकारिकया व्यङ्ग्यत्वेन (आक्षेपेण) उपनिबध्नाति नियतीति। कवेरुपास्या उपास्योपासकभावसम्बन्धेन षष्ठी, भारती वागधिष्ठात्री देवता कर्त्री, नियतिकृत-नियमरहितां नियम्यते सौरभादयो धर्मा अनेनेति नियतिरसाधारणो धर्मः पद्मत्वादिरूपोऽदृष्टं वा तेन कृतो यो नियमः पद्मादिपदं पद्मादावेव शक्तं न मुखादाविति रूपस्तेन रहिताम्, ह्लादैकमयीं ह्लादोऽलङ्कारकृतचमत्कारः स एव ह्लादैकः, एकशब्द इह मात्रार्थे तेन लक्षणया ह्लादमात्ररूपेऽति लभ्यते, ह्लादमात्ररूपैव ह्लादैकमयी ताम्, स्वार्थे मयटि टित्वाट्टिड्ढेति ङीप् न तु दुःखमोहमयीमपीति भावः।

CLOSING (W.) & COLOPHON :

पुनरुक्तवदाभासो विभिन्नाकारशब्दगा।
एकार्थतेव शब्दस्य तथा शब्दार्थयोरयम् ॥९

इति भरतसूत्रे नवमः पादः॥

CLOSING Ct.

पुनरुक्तवदाभासं लक्षयति—

पुनरुक्तवदिति—विभिन्नाकारशब्दगा—विभिन्ना आकारः स्वरूपं ययौस्तौ शब्दौ गच्छति तथाभूताया एकार्थतेव आपाततः प्रतीयमाना भिन्नार्थता वस्तुतस्तु भिन्नार्थतेव, अयं पुनरुक्तवदाभासोऽलङ्कारः। पुनरुक्तवदाभासते आपातातः प्रतीतिविषयो भवति शब्दार्थो यस्मिन्निति व्युत्पत्तेः; एनं विभजते। अयं शब्दस्य तथा शब्दार्थयोश्चेत्यर्थः। एवं च शब्दमात्रनिबन्धनः शब्दार्थ-निबन्धनश्चेति द्वैविध्यमस्योपरिवृत्यसहमात्रशब्दप्रयोगे शब्दमात्रनिबन्धनः, स च सभङ्गश्लिष्टनिष्ठः, अभङ्गश्लिष्टनिष्ठश्चेति द्विविधः। उभयविधशब्द-प्रयोगे शब्दार्थनिबन्धनः, अतस्त्रैविध्यमस्य सम्पन्नम् ॥९॥

COLOPHON : इति पर्वणीकरोपनामकसीतारामविरचितायां लक्षणचन्द्रिकायां शब्दालङ्कारनिरूपणो नाम नवमपादः समाप्तः॥ छ छ छ छ॥

521. क्षेमकुतूहलम्

OPENING : ॥ श्रीगणेशाय नमः ॥

कपोलतलनिर्गतप्रमदवारिधारालस-
स्वदंह्रिकुलकाकलीकलितमञ्जुकोलाहलः ।
गिरीशतनयो गुरुः सकलसिद्धिवारांनिधि-
र्भिनत्तु दुरितानि वः सतिलमोदकादः सदा ॥

× × × ×

भरद्वाजकुलाम्भोधौ वलक्षः पक्षयोर्द्वयोः ।
द्विजराजततिर्जाता निष्कलंका सदाऽक्षया ॥
सन्नाहरूढान्वयभूषणोभूत् सलक्ष(क्ष्म)णो लक्षणपूर्णगात्रः ।
भिषग्वरो राक्षसराजधान्यां विभीषणं यो विगदं व्यधत्त ॥

× × × ×

गौरीमतं च नल(चरक)वाग्भटभीमसूक्ति हारीतसु[श्रु]तमतं रविसिद्धपाकम् ।
क्षेमो भिषग्वरसुधीरवलोक्य सम्यग् ग्रन्थं व्यधत्त खलु क्षेमकुतूहलाख्यम् ॥

CLOSING : नारङ्गे गुडभक्षणं च कथितं मत्स्योद्भवे काञ्जिकं,
गोधूमेऽपि व कर्कटी हितकरा शेषाणि बुध्या जयेत् ।
प्रंशोद्य(वंशोयं)किमु वर्ण्यते सुविमलो नानागुणैरुत्तमो
यत्रैकेन विभीषणश्च भिषजा नीरोगतामाप्तवान् ॥
श्रीरामादपरेण पारुविधिता (या सुविदिता) लब्धा हि कोलापुरी
ग्रामा द्वादश एव नान्यविदुषा लब्ध्वा हि ढिल्लीश्वरात्
पुत्राः क्षेमभिषग्वरस्य षडिमे नानागुणैरुन्नता
गोपालः शिवपालमाधववरौ नारायणोत्यद्भु तः ॥श्री॥

COLOPHON : श्रीषेमकुतूहलग्रन्थ सम्पूर्णम् ॥

520. क्षेमकुतूहलम्

Same as above.

522. पाकावलिः

OPENING : ।। श्रीगणेशाय नमः ।।

।। अथ पाकावली ।।

तत्रा .... न्मानं भृशं कर्त्तयेत् ।
तमन्नजलयोगतो मृदुतरं संकुट्य .... ।।

CLOSING : रसं गन्धं विषं चैव दरदं समनःशिला ।
र[ए]तानि समभागानि मरिचं चाष्टटंककम् ।।
त्रिकटुं टंकषष्ठं स्यात् ष(ख)ल्वे कृत्वा विचूर्णयेत् ।
कप(र्ष)ककं मरिचं दद्यात् पृथक् चूर्णानि कारयेत् ।।
आर्द्रकं रसतांबूलं पुटं देयं भिय(ष)क्वरैः(ग्वरः) ।
काशं श्वासं क्षयं हिक्वां नाशयेच्च तत्क्षणात् ।
रसं श्वासकुठारोऽयं चरकेन प्रकाशितम् ।

COLOPHON : इति पाकविधिग्रन्थ सम्पूर्णम् ।।

Post-colophonic : सः १९६३ का मिती मांगसिर सुदि १५ शुक्रवासरे लिपिकृतं वैष्णव जानुकीदास ।। पठनार्थं सेठजी साब सौभागमलजी ।।

566. प्रस्तावसागरः

OPENING : ।। श्रीगणेशाय नमः ।। श्रीशारदायै नमः ।। श्रीगुरुभ्यो नमः ।।

नत्वा विघ्नविनाशनं गणपतिं श्री माधवं शङ्करं,
मार्त्तण्डं मरुदात्मजं च गिरिजां धात्रात्मजां चेन्दिराम् ।
श्रुत्वा कोविदगद्यपद्यरचनां संगृह्य ग्रन्थान्तरात्,
कुर्वेहं सुधियां मुदेतिरमणं प्रस्तावरत्नाकरम् ।।१।।
यस्य प्रस्तावपद्येषु भवेद्वाञ्छा गरीयसी ।
तेनैको विदुषा सेव्यो नित्यं प्रस्तावसागरः ।।२।।
प्रस्तावसागरो येन न दृष्टो न श्रुतोपि वा ।
स नरो विदुषां मध्ये वक्तुं जानाति किं वचः ।।३।।
प्रस्तावसागरे सन्ति तरङ्गा युगभूयुताः ।
तेषां नामानि वक्ष्यामि तरङ्गाणामहं क्रमात् ।।४।।

नमस्कृत्याशिषो राजप्रस्तावो गद्यसंज्ञकः ।
ततोऽन्योक्तिकसंकीर्णो प्रशंसा-घन-हास्यकाः ।।५।।
सज्जनाऽसज्जनश्चाथ शृङ्गारो नीतिकाभिधः ।
स्मृतिर्वैराग्यकश्चैते तरंगाः कथिता मया ।।६।।
सुभाषितमयं द्रव्यं यो न संचयते नरः ।
स च प्रस्तावयज्ञेषु कां प्रदास्यति दक्षिणाम् ।।७।।

CLOSING : लक्ष्मि त्वज्जनकेन दारहरणाद् गङ्गाधरे[किं]कृतं,
दत्तं नाथ विषं मयापि च रुषा भिक्षुः कपालीकृतः ।
दग्धे त्वत्तनये निशि स्नपयसि त्वं तस्य लिङ्गं करै-
रित्थं श्रीकमलालयाप्रहसितो व्यग्रो हरिः पातु वः ।।१७८।।

COLOPHON : इति श्री प्रस्तावसागरे भगीरथविरचिते आशीर्वादप्रस्तावसमुच्चयो नाम द्वितीयस्तरङ्गः ।।

———

APPENDIX-4

(Extracts from important Manuscripts)

3. Pt. Visvanātha Sāradānandana Collection

42. निर्णयकौतुकम्

OPENING : ॥ श्रीगरोशाय नमः ॥

प्रणम्य जानकीजानिं महाशब्दोपनामकः ।
विश्वेश्वरः सुबालानामवबोधार्थमादरात् ॥१॥
हेमाद्रिमाधवौ वीक्ष्य मयूखं कौस्तुभं तथा ।
यत्नान्निर्णयसिन्धुं च मदनं निर्णयामृतम् ॥२॥
कल्पद्रुमं च तिथ्यर्क्कं कालतत्वविवेचनम् ।
फक्किकाभिर्वितनुते लघुनिर्णयकौतुकम् ॥३॥

तत्र तिथिर्द्वेधा—शुद्धा विद्धा च । शुद्धा सम्पूर्णत्वान्निर्णयानर्हा, तिथ्यन्तरयुता विद्धा । वेधस्तु सायंप्रातस्त्रिमुहूर्त्तात्मकः ।

COLOPHON : ॥ अथ पुण्यतिथयः ॥

अमावास्या तु सोमेन सप्तमी भानुना तथा ।
चतुर्थी भांनुपुत्रेण अष्टमी बुधसंयुता ॥
चतस्रस्तिथयः पुण्याः सूर्यग्रहणसन्निभाः ।
स्नानं दानं तथा श्राद्धं तत्सर्वं चाक्षयं भवेत् ॥
तुलामकरमेषेसु प्रातस्स्नानं सदा भवेत् ।

इति कार्त्तिकमाघवैशाखस्नानानि । तानि मलमासादौ गुर्वस्तादावपि च कार्याणि । यदा वैशाखादौ मलमासपातस्तदा मासद्वयं स्नानदानादि ।

CLOSING : इति पौण्डरीकयाजिविश्वेश्वरविरचितं निर्णयकौतुकं समाप्तम् ॥

156. पूर्वपक्षावली

OPENING : …ति सम्प्रसारणे पूर्वरूपे च ओयत इति रूपम् । तस्यैव धातोः कर्मणि लङि ओयत इति रूपम् । अत्र हि वान्तादेशनिवृत्त्यर्थं न यकीति सूत्रमस्तु । यकि परे एचो वान्तादेशो न स्यादित्यर्थात् सिद्धम्—ओयते ओयत इति० ।

CLOSING : नचैङ्ह्रस्वादिति सूत्रस्थं हे ज्ञानेत्पादौ लोपोपत्तये हल्पदानुवृत्तिव्यधिकरणान्वयाङ्गीकारपरं भाष्यं बाधकमस्तीति मैवम् । लाघवात् सामान्यापेक्षमेव ज्ञापकं सिद्धमित्युक्तम् । व्यधिकरणान्वयहल्पदानुवृत्तिपरं भाष्यमेकदेश्युक्तिर्गौरवात् । तस्मान्मकारछन्दोगाक्षेपव्यधिकरणान्वयहल्पदानुवृत्तयो न वक्तव्या इति न क्वापि दोषलेशः । अत्र समाधानं विभावयन्तु ।

COLOPHON : इति श्रीमद्धोरिलशर्मणा कृता पूर्वपक्षावली समाप्ता ॥ श्री शिवं ॥

180. बालग्रहस्तवः

OPENING : ॥ श्रीरामो जयति ॥

प्रणम्य शिरसा शान्तं गणेशानन्तमीश्वरम् ।
बालग्रहस्तव वक्ष्ये समस्ताभ्युदयप्रदम् ॥१॥
तपसा यशसा दीप्त्या वपुषा विक्रमेण च ।
निर्दिष्टो यः सदा स्कन्दः स नो देवः प्रसीदतु ॥२॥

CLOSING : दिव्यस्तोत्रमिदं पुण्यं बालरक्षाधिकारकम् ।
जपेत् सन्तानसिद्धचर्थे बालदोहोपशान्तिदम् ॥५६॥

COLOPHON : इति बालग्रहस्तवः समाप्तः ॥छ॥

Post-Colophonic : लिखितमिदं माघसितद्वादश्यां शुक्रे दीक्षितजी-चिरंजीविरक्षाधिकारार्थम् छ ॥ छ ॥ छ ॥ छ ॥

187. मन्त्ररत्नम्

OPENING : श्रीगणेशाय नमः ॥

ॐ उन्नतैककुचमुन्नतनासं चैकतः श्लथदमन्ददुकूलम् ।
एकतः कनकहरमुदारणेरमस्तु सुखदं शिववस्तु ॥१॥
प्रणवं कमलामथोद्धरेद् भुवनेशीं मकरध्वजं ततः ।
वनितां वनवैरिण [:] स्मृता जगदुज्जीवनिका षडक्षरी ॥२॥

CLOSING : नीला नाभेरधस्तादुपरिपरिपतन्मत्तमैलन्दकान्तिः,
कान्ता शम्भोस्तदूर्ध्वं समुदितपनस्यष्टरोचिःप्रसंन्ना ।
ध्याता सर्वेष्टसिद्धचै सुरनरनमिता भर्गभाग्यैकसीमा,
भूयादित्यद्रिपुत्री पतिमुपनयति(?) स्वीयवाक्पेलवेषु ॥६॥

COLOPHON : इति श्रीमत्समस्ततंत्रार्णवप्रज्ञानौकर्णधारमिश्रगणेशात्मजहरिप्रसाद-माथुरनिर्मिते मन्त्ररत्ने तृतीयो मयूखः ॥३॥

194. चक्षुष्मतीविद्यामन्त्रः

॥ श्रीमार्त्तण्डभैरवाय परप्रकाशसहिताय नमः ॥

सूर्याक्षितेजसे नमः १ खेचराय नमः २ असतो मां सद्गमय ३ तमसो मां ज्योतिर्गमय ४ मृत्योर्मा अमृतं गमय ५ उष्णो भगवाञ्छुचिरूपः ६ हंसो भगवाञ्छुचिरप्रतिरूपः ७ विश्वरूपं घृणिनं जातवेदसं हिरण्मयं ज्योतिरेकं तपन्तं ॥ सहस्ररश्मिः शतधा वर्त्तमानः प्राणः प्रजानामुदयत्येष सूर्यः ८ ॐ नमो भग[व]ते सूर्यायाहोवाहिनि वाहिन्यहो वाहिनि वाहिनि स्वाहा ९ वयं सुपर्णा उपसेदु-रिन्द्रं प्रियमेधा ऋषयो नाधमानाः ॥ अपध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य-स्मान्निधयेवबद्धान् १० पुण्डरीकाक्षाय नमः ११ पुष्करेक्षणाय नमः १२ अभलेक्षणाय नमः १३ कमलेक्षणाय नमः १४ विश्वरूपाय नमः १५ श्रीमहाविष्णवे नमः १६ इति षोडश मन्त्रा दूरदृष्टिप्रदा चक्षुष्मती विद्या परिपूर्णा लिखि० टोपरोपाह्व राजारामपन्तेन श्रीमच्छारदानन्दन विश्वनाथदो-क्षितकृतये ॥ तेन प्रीयतां सविता ॥

200. मन्त्रमुक्तावलिः

OPENING : ॥ श्रीगणेशाय नमः ॥

॥ अथ दीक्षाविधि लिख्यते ॥

श्लोक—पुरा कृत्याजु(तयु)गस्यादौ विष्णुलोकं गतो मुनिः ।
ददस(र्श) पुरुषं तत्र लक्षंम्या(क्ष्म्या) शहमं(सम)न्वितः ॥१॥

CLOSING : मीन(न)राशिदामोदरमंत्रः—ॐ ह्रीं दामोदराय देवकीनन्दनाय नमः ॥
तथा च कृपान(ण)मन्त्रः—ॐ ह्रीं श्रीं क्लीं रथांगचक्राय नमः ॥

ये(ए)ते मंत्र[ा]मया प्रोक्त(क्ताः) तुभ्यं णा(ना)रदसत्तम ।
श(स)र्वेभ्यश्च पुराणेभ्यश्चतुर्विशतिसंख्ययः(काः) ॥

COLOPHON : इति श्रीमंत्रमुक्तावल्यां कृष्णनारदसंवादे तृतीयोध्याय: ।।३।। सुभं भवेत् मस्तु ।।

Post-Colophonic : माघसुद्वि २ संवत्तु १८५० लिष्षितं पं० सोतीकरनजू ॥ श्री

210. बालार्चापद्धतिः

OPENING (on f. 5) : [द]क्षांसे । ह्रीं श्रीं ज्ञं ज्ञानाय नम: । वामांमे ह्रीं श्रीं वैराग्याय० दक्षोरौ । ह्रीं श्रीं ऐं ऐश्वर्याय ० वामोरौ । ह्रीं श्रीं अं अनन्ताय नम: । हृदये ह्रीं श्रीं पद्माय ० । हृदये । इति पीठन्यास: ।

CLOSING : ऋष्यादिकराङ्गन्यासव्यापकन्यासान् विधाय देवीं ध्यात्वा चक्रमध्ये आवाह्य पंचोपचारैरभ्यर्च्य अंगावरण-इन्द्राद्यावरण-वज्राद्यावरणै: अभ्यर्च्य यथाशक्ति मंत्रं जप्त्वा देवीं विसृज्य सुखं विहरेत् ।

212. वीरभोजनविधिः

OPENING : श्री: ।। अथ नारायणबलिदिनात्पूर्वंदिने वीरभोजनमुक्तं देवराजदेवीये-तिथ्याद्युल्लिख्य पृथिव्यादिस्थवीराणां प्रीतिद्वारा अमुकगोत्रस्यामुकनाम्न: आत्महननाद्यन्यतमदोषनिवृत्तिपूर्वकं करिष्यमाणनारायणबलिकर्मण्यधिकार-सिद्धिद्वारा प्रेतसद्गत्यर्थं वीरभोजनविधिं करिष्ये इति ।

CLOSING : ये द्युलोके स्थिता वीरा: प्रेतस्य गतिकारका: ।
मया कल्पितमन्नादि प्राश्नन्तु पूजिता: सदा ।।

भुक्तवत्सु द्विजेषु तेभ्य: सोदकुम्भदक्षिणाताम्बूलादि दत्त्वा तेषा-माशीर्वाद गृहीत्वा यस्य स्मृत्येति विष्णुं स्मरेदिति विधि: ।।१।।

260. राधाविनोदकाव्यम्

OPENING : ।। श्रीगणेशाय नम: ।। श्रीसरस्वत्यै नम: ।।

मालीनो घनमाली मालीनो वनमाली ।
मालीनो बलमाली मालीनोवतु माली ।।१।।
विधुसुहृद्विरहानलपीडिता विधुसुहृत्तरनानिलपीडिता ।
विधुसुहृद्वदनालि(म)पीडिता विधुसुहृत्सुगिरोकिरदीडिता ।।२।।

CLOSING : रामचन्द्रकविना कविनादः पूरुषोत्तम सुतेन सुतेन ।
राधिकाहृदयशोकदमासीद्राधिकाहृदयशोकदमासीत् ॥१६॥

COLOPHON : इति श्रीराधाविनोदाख्यं काव्यं समाप्तम् ॥

273. विवादपत्रम्

OPENING : ॥ श्रीगणेशाय नमः ॥

तुह्योस्तातङिति । इह तातङो ङित्वमन्त्यादेशाय किन्न स्यादित्यत्र अन्त्यादेशाभावे ज्ञापकंमुदभावि भगवता पतञ्जलिना० ।

CLOSING : ० सेर्हीत्यतोनुवर्त्य युयुधि योयोधीत्यत्रागुणभावार्थं विकल्प्यते । न च लाघवाङ्गीकारे वेतोन्यत्रेत्यस्याग्रे हि छन्दसीत्येव कार्यं स्यात् । तथा च ॥ सैष दाशरथी रामः ॥ श्रीदारमार्गं छ छ छ ॥

हस्ताक्षर गोविंद चिमनाजि कुकडेचा ।

299. एकाक्षरीकोष:

OPENING : ॥ श्रीगणेशाय नमः ॥

अथैकाक्षरसंज्ञा लिख्यते ॥
अकारो वासुदेवः स्यादाकारस्तु पितामहः ।
इकार उच्यते का [मो]लक्ष्मीरीकार उच्यते ॥

CLOSING : क्षः क्षेत्रे रक्षसि प्रोक्तो बुधैः क्षः शब्दशासने ।
इत्येवं श्लेषनामानि कथितानि बुधैः सदा ॥ ३०॥

COLOPHON : इत्यनेकार्थमंजरी समाप्ता ॥
&
Post-Colophonic : बालोपकारहेत्वीयं लिखितोक्ता बुधैः सता ।
ऋष्युत्तरशतैकोनविंशतो हायने मया ॥१॥
राधिकेशे नामवति वासरे भानुनामके ।
दीर्घाहनि सिते पक्षे नाम्नानेकार्थमंजरी ॥२॥

305. काव्यप्रकाशः सटीकः

OPENING : ॥ श्रीगणेशाय नमः ॥

मुखैश्चतुर्भिः स्तुवते विधात्रे स्तोत्रे श्रुतीनां च चतुष्टयाय ।
भुजैश्चतुर्भिश्चतुरोर्थवर्गान्नमो ददानाय चतुर्भुजाय ॥१॥
दुर्व्याख्याजनितप्रमोहशमिनी वैश(ष)म्यविध्वंसिनी,
वैशिष्ट्यादतिरोचिनी रसखनी काव्यार्गलोद्घाटिनी ।
टीका विज्ञजनप्रमोदजननी भावार्थचिन्तामणी,
भट्टाचार्यमहेश्वरेण रचिता काव्यप्रकाशोपरि ॥२॥

CLOSING (On f. 18) : अत्र प्राचोनाः—लक्ष्यमित्यत्र लक्षणामूलव्यंग्यमित्येवार्थ. । लक्ष्यार्थौ तु सद्भावस्नेहपदयोरसद्भावास्नेहावेव, एवं मम कृत इत्यत्रापि स्वस्य कृत इत्येवार्थः । न चैवं तेन चेत्यादिना व्यंग्यान्तरकथनमनुपयुक्तमिति वाच्यम् । प्रसङ्गादेव व्यंग्यस्यापि व्यंग्यान्तरकथनादित्याहुः । तन्न । लक्ष्यस्य यथेत्यनेनैव लक्षणामूलत्वप्राप्तौ पुनस्तत्कथ ० ··· ।

306. काव्यप्रकाशः सटीकः

OPENING : ॥ श्रीगणेशाय नमः ॥

नत्वा गणेशं वाग्देवीं साम्बं शम्भुं च राघवम् ।
श्रीरामकृष्णपितरं नत्वोमाख्यां च मातरम् ॥१॥
नारायणात्मजश्रीमद्रामकृष्णात्मजः कृती ।
काव्यप्रकाशगां व्याख्यां तनोति कमलाकारः ॥२॥
काव्यप्रकाशे टिप्पण्यः सहस्रं सन्ति यद्यपि ।
ताभ्यस्त्वस्या विशेषो यः पण्डितैः सोऽवधार्यताम् ॥३॥
यः शुष्कतार्किकम्मन्यो मीमांसागन्धशून्यकृत् ।
नाधीती मत्कृतेर्द्वेषात्तस्य वाग्डम्बरं वृथा ॥४॥

CLOSING (On. f. 40) : तस्यापीति । तस्य तत्तत्प्रभाववत्त्वेन ख्यातस्यापीत्यर्थः । केनापीति पाठे उक्तदिशा मयेति व्यंग्यस्यारूढता । तस्येति पाठे तु अर्थान्मयेति गूढत्वान्मुख्यध्वनित्वम् । तज्जयान्नायकोत्कर्ष इति रीत्या फणिपाशबन्धादिस्वापमानलज्जापह्नुतिश्चालक्ष्मणोपि तथेत्यर्थः । द्वितीयं भेदं विवृणोति अप-

रस्येति—वाक्यार्थीभूतस्य रसादेरङ्गं रसादिः आदिशब्दाद्भावतदाभासभाव-
शान्तिभावोदयभावसन्धिभावशबलताः ।

309. रसमञ्जरी-व्यंग्यार्थकौमुदी

OPENING : ॥ श्रीगणेशाय नमः ॥

सर्वे साधुजनाः सदायतहृदा सत्सम्प्रदायादलं,
य(ज्)ज्ञानाय कणादगौतममतान्यालोच्य तत्त्वार्थदान् ।
वेदान्तान् परिशीलयन्ति रहसि स्वानन्दकन्दारकं,
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितम् ॥१॥

× × ×

आसीदासीमभूमीपतिपरिवृढोद्दण्डचण्डप्रताप—
ज्वालामालाकरालानलस(श)मनमहावारिवाहप्रवाहः ।
विद्वद्दानाम्बुधाराचिरपरिचयोत्पादितानल्पधर्मः,
स्वःशाखाख्यातकीर्त्तिः प्रमुदितहृदयः काशिराजाभिधानः ॥६॥

× × ×

तद्वंशजो धनुरिवाभवदेकवीरः सत्पार्थिवप्रकरकेलिविलासशाली ।
यो लक्षदः क्षितितले किल मार्गणानां राजा प्रतापवररुद्रमनोजकान्तिः ॥८॥

× × ×

विद्वद्भिः समुपाश्रिता मुनिगणव्रातैः पुराणैः पुरा,
शाखाभिर्निगमद्रुमस्य रचिता विद्यातरिः सादरम् ।
मग्नाप्यत्र दरिद्रभावजलधौ सत्कर्णधाराधिक—
श्रीवीरोद्भटचन्द्रभानुविभुना येनाधुना तार्यते ॥२०॥
व्यञ्जनामग्नचित्तेन गौतमीतीरवासिना ।
श्रीत्र्यम्बकतनूजेन पण्डितानन्तशर्मणा ॥२१॥
रसिकश्रुतिभूपास्ति भुवि या रसमञ्जरी ।
व्यंग्यार्थकौमुदी तस्यास्तन्यते तत्कुतूहलात् ॥२२

COLOPHON : इति श्रीगौतमीतीरपुण्यस्तम्भस्थितिमतिविलासशालिनीलकण्ठपं ···· तनूजवालोपंडितांगजश्रीत्र्यम्बकपण्डितात्मजानन्तपण्डितविरचिता श्रीमहाराजाधिराजप्रभुकुलतिलका[यमा]नश्रीवीरसिंहजूदेवतनूजप्रौढप्रतापद्युमणिमरीचिनिरस्तसकलजनदुःखौघध्वान्तश्रीचन्द्रभानुकुतूहल[कुमु]दत्रनविकासिनी रसमञ्जरी व्यंग्यार्थकौमुदी सम्पूर्णतामगमत् श्रीरस्तु शुभं भवतु ।

Post-Colophonic : संवत् १८४६ श्रावणे [मा] से कृष्णपक्षे तिथौ द्वादश्यां रविवासरे कौ पूर्णं भवत् पुस्तकं संजुतः समाप्तः रसमंजरी सुभ भवत श्रीः श्रीः। पुस्तक रसमंजरीचे गंगाधरविश्वरूप यांचे असे।

———

APPENDIX-5

(Extracts from important Manuscripts)

4. Mahārājā's Public Library Collection

2. निर्णयामृतम्

OPENING : ।। ॐ श्रीगणेशाय नमः ।।

ॐ आदावस्मिन्नुदाहारः कथितः प्रथितक्रमः ।
एकभक्तादिकानां तु व्रतानां तदनन्तरम् ।।
निरूपणं स्वरूपं च तत्तिथीनां च निर्णयः ।
साधारणं द्वितीयादियुग्मानामथ निर्णयः ।।

CLOSING & COLOPHON : बुधानामुपकारार्थं कालव्यामूढचेतसाम् ।
गोपीनारायणेनेदं निर्णीतं निर्णयामृतम् ।।इति।।

श्रीसूयसेनभूभृद्विमलयशःक्षीरसागरादुदिते ।
इति निर्णयामृतेऽस्मिन्नशौचस्यापि निर्णयो जातः ।।

।। समाप्तोऽयं निर्णयामृतम् ।।

Post-Colophonic : संवत् १६०७ माघशुदि चतुर्दश्यां शनिवारायां तदर्धदिनं समाप्तं पंडित ब्राह्मण उत्तमप्रकृति निर्मलवाचिकं च ।। शुभं भवतु । यतो गृहं मध्ये लिख्यतं ततः कांतिशुभं सर्वं च । तथा ।।

7. गायत्रीपुरश्चरणचन्द्रिका

OPENING : ।। हरये नमः ।।

अनन्ताख्यं गुरुं नौमि कवित्त्वप्रतिभाकरम् ।
शास्त्रवल्लीजलधरं स्फुरत्कीर्त्तिकरं परम् ।।१।।
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय सरूपाय दक्षिणामूर्त्तये नमः ।।२।।
नत्वा ब्रह्ममयीं देवीं सच्चिदानन्दरूपिणीम् ।
काशीनाथः प्रतनुते पुरश्चरणचन्द्रिकाम् ।।३।।

तत्र मूलवचनानि शारदातिलके—

अथ वक्ष्यामि गायत्रीं तत्त्वरूपां त्रयीमयीम् ।
यया प्रकाश्यते ब्रह्म सच्चिदानन्दलक्षणम् ॥१॥

CLOSING : लिङ्गरूपगायत्रीचक्रोद्धारमाह स्कान्दे—

नवसप्तभूतगुणा भूतसप्तनवाग्निभिः ।
गायत्र्यास्तु महाचक्रं लिङ्गरूपं विचिन्तयेदिति ॥

COLOPHON : इति श्रीमद्भट्टोपनामकजयरामभट्टसुतवाराणसीगर्भसंभवकाशीनाथभट्टविरचिता गायत्रीपुरश्चरणचन्द्रिका समाप्ता ।

Post-Colophonic : सं० १८७७ फाल्गुन वद्य सप्तम्यां लिखिता ॥

8. प्रतिष्ठातिलकम्

॥ र्द० ॥ श्रीगणेशायनमः ॥ ॐ नमः शिवाय ॥

OPENING : ईश्वर उवाच—

अथ वक्ष्ये समासेन प्रतिष्ठाशास्त्रमुत्तमम् ।
सर्वेषां [चैव] देवानां नमस्कृत्य विनायकम् ॥१॥
सर्वतंत्रेषु सामान्यं प्रतिष्ठातिलकं शुभम् ।
अनेनाधीतमात्रेण सर्वपापाद्विमुच्यते ॥२॥

ईशानपीठे ग्रहपीठवास्तुपीठौ स्नानमण्डपं पूर्वाभिमुखं उद्धरेत् इत्यनुक्रमणिका ॥

COLOPHON : इति प्रतिष्ठातिलकः समाप्तः ॥

Post-Colophonic : संवत् १७९६ वर्षे भाद्रपदमासे शुक्ले पक्षे तिथ्यौ १ प्रतिपदा शुक्रे लिषतं मनीरामेण दधीचान्वये राज्यश्रीमोहनसिंहजीराज्ये ॥ शुभं भूयात् । श्रीरस्तु ॥ श्री ॥

17. भागवतभूषणम्

OPENING : श्रीगणेशाय नमः ॥ श्रीरुक्मिणीपतये द्वारकानाथाय नमः ॥

लक्ष्मीनारायणं नत्वा गोपालः कुरुते सुधीः ।
सज्जनानन्दसन्दायि श्रीभागवतभूषणम् ॥१॥

तत्र तावत् अर्थवादाधिकरणसम्मतां भवत्यर्थं भगवन्महिमोक्तिरिति भक्तिपादीयां श्रीमदाचार्योक्तिमनुसृत्य महापुराणचक्रवर्त्तिनः श्रीमद्भागवतस्य महिमा प्रस्तूयते। यथा पाद्मीयोत्तरखण्डे श्रीभागवतमाहात्म्ये षष्ठेऽध्याये।

CLOSING : अष्टोत्तरशतावृत्या भागवतपुरश्चरणमिति शिष्टाः। भागवतशकुनप्रकारो ब्रह्मयामलोक्तो विधानमालायामिति शिवम्।

इत्थं यथामति कृतं श्रीभागवतभूषणम्।
प्रीयतां तेन भगवान् मथुरानायकोऽच्युतः॥

COLOPHON : इति नारायणपरायणश्रीकरहाटकक्षेत्रवासिवासुदेवाचार्यसुत नारायणाचार्याङ्गज-गङ्गागर्भजगोपालाचार्यविरचिते श्रीभागवतभूषणे सप्ताहविधानकथनं नाम चतुर्थोल्लासः॥ श्रीकृष्णार्पणमस्तु॥ अनुक्तपूरणदुरुक्तनिष्कासनाभ्यां भगवद्भक्ताः साधवः शोधयन्तु॥ इति भागवतभूषणं समाप्तम्॥

18. भागवतशास्त्रार्थः

OPENING : ॥ श्रीगणेशाय नमः॥

ॐ व्यासकृताष्टादशपुराणपरिगणपरेषु ब्राह्मं पाद्मं वैष्णवञ्चेत्यादिषु सर्वेषु पुराणवाक्येषु भागवतं नाम पुराणमेकमेव परिगणितम्। लोके तु श्रीमद्भागवत-देवीभागवताख्यौ ग्रन्थौ द्वौ प्रसिद्धौ तत्र कतरो व्यासकृताष्टादशपुराणान्तर्गत इति जिज्ञासायां श्रीमद्भागवताख्य एव तथेतिपुराणान्तरवचनैर्निर्णीयते।

CLOSING : पुराणेषु तु सर्वेषु श्रीमद्भागवतं परं।
यत्र प्रतिपदंम्विष्णुर्गीयते बहुधर्षिभिः॥
इति सङ्कल्पमनसा श्रीमद्भागवताभिधम्।
जन्माद्यस्ययतश्चे ति।

26. विवादार्णवभञ्जनम्

OPENING : ॥ श्रीगणेशाय नमः॥

विश्वेषां शरणं नवाम्बुदरुचिः सद्भक्तचिन्तामणि-
र्यः प्रत्यूहतमोविनाशमिहिरः कीनाशभीनाशनः।

संसारैकमहार्णवे निपततां निस्तारबीजं नृणां,
गोविन्दः कृपया सुरासुरगणैर्वन्द्यङ्घ्रिरं पातु वः ॥१॥
चण्डेशवारेश्वरविश्वरूपा मिताक्षराकारहलायुधौ च ।
श्रीकृष्णवाचस्पतिधर्मरत्नकृतस्तथा श्रीकरशूलपाणी ॥२॥
गोविन्दलक्ष्मीधरतत्वकारा आचार्यचूडामणिना च भट्टः ।
वाक्यानि चैषां सुविमृश्य कुर्म्मो ग्रन्थं विवादार्णवभङ्ग ।ाख्यम् ॥३॥
इह वाच्यानि वर्णादिः सृष्टिर्वर्णस्य वृत्तयः ।
राजप्रशंसातच्छत्रमन्त्रिदूतादिलक्षणम् ॥

CLOSING : उदितो विस्तरेणायं मिथ्याविवदमानयोः ।
अष्टादशसु मार्गेषु व्यवहारविनिर्णयः ॥
एवं कार्याणि सर्वाणि सर्वान् सम्यङ् महीपतिः ।
देशेनुलब्धानि शेत लब्धांश्च परिपालयेत् ॥

बालेश्वरकृपारामसमगोपालकृष्णजीवनाख्यैः वीरेश्वरकृष्णचन्द्रश्रीगौरीकान्ताभिधानैः सदिमः कालाशङ्कर-स्यामसुन्दर-कृष्णकेशवसंगैःसीताराम-संगैश्चात्र कृतो ग्रन्थः स्फुरतु सभायाम् ।

इत्यनेकविषयवासिविद्वद्वृन्दोपवर्णितः ॥
विवादार्णवभंगाख्यो ग्रन्थः सम्पूर्णतां गतः ॥

Post-Colophonic : संवत् १८८४ कौमारमासे कृष्णे पक्षे ६ भौमवासरे ॥१॥

101. नृपविलासकाव्यं सटीकम्

OPENING : ॥ श्रीहरिः ॥ अथ नृपविलासकाव्यं सटीकम् ॥
॥ श्रीगणेशाय नमः ॥
नत्वा महेशस्य पदारविन्दं वाग्देवतायाश्चरणाम्बुजन्म ।
श्रीलक्ष्मणाख्यं पितरं प्रणम्य करोमि काव्यं सुगमं लघीयः ॥१॥
(टीका) अतनुमखिललोकव्याप्तविक्रांतिभाजं,
कुसुमधनुषमारात् यो व्यधाल्लीलयैव ।
तमलमखिललोकाधारमीशानमम्बा-
कलिततनुमजस्रं भावयामो निकामम् ॥

काव्यं नृपविलासाख्यं रत्नं रामाननात्खनेः ।
निःसृतं व्याख्यया सद्यः शाणेनोज्ज्वलयाम्यहम् ॥

तत्र तावत्कविकुलालङ्कारभूतो रामाभिधानः कविश्चिकीर्षिताविघ्नपरिसमाप्तिकामः स्वेष्टदेवतानमस्काररूपं मङ्गलमाचरन् चिकीर्षितं प्रतिजानीते—नत्वेति ॥

CLOSING : काव्यानीषुमितानि तद्विवृतयः स्तोत्राणि दिक्संख्यका-
न्येकश्छन्दसि चैक एव गणिते साहित्यशास्त्रे त्रयः ।
प्राक्काव्यद्वयटिप्पणीद्वयमिति ग्रन्थावली संगता,
सीतारामकवेः कृतिः कृतिगले नक्षत्रमालायताम् ॥१॥

COLOPHON : इति श्रीपर्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मज-सतीगर्भसंभवश्रीसीतारामकविविरचितायां स्वकृतनृपविलासकाव्यटीकायां नृपविलासिकायां षोडशः सर्गः ॥१६॥

Post-Colophonic : लिखितमिदं पुस्तकं गौरोशङ्करराधामोहनाभ्यां मिलित्वा सं० १९४६ शुभं भवतात् ॥

102. नलायनम्

OPENING : ॥ श्रीः ॥ नलायनं नाम कुबेरपुराणम् ॥

॥ प्रथमस्कन्धे प्रथमः सर्गः ॥

॥ श्रीगणेशाय नमः ॥

जयति जगति देवः केवलज्ञानमूर्त्ति—
र्म्मदमदनविजेता शाश्वतो वीतरागः ।
जयति कुमुदशुभ्रा भारती भूरिभावा,
जयति कविकुलानां कोमलो वाक्प्रपञ्चः ॥१॥
दुरितदलनसज्जः सज्जनोदारधीरो,
धनवितरणवीरो धर्म्मविश्रामशाखी ।
जयति जगति नित्यं निश्चलो निःकलंकः,
सकलकलुषहारी लोकपालः कुबेरः ॥२॥

CLOSING : उत्पत्तिदौत्यवरविड्वरशीलशूचा-
सयोगराज्यभवनिर्वहणाभिधेया ।
स्कन्धा भवन्ति दश यस्य नलायनस्य,
पूर्णं तदेतदधुना धनदप्रसादात् ॥२३॥

COLOPHON : इति श्रीमाणिक्यसूरिविरचिते नलायने कुबेरपुराणे महाकाव्ये दशमे निर्वहणस्कन्धे चतुर्थः सर्गः ।४। समाप्तश्च दशमः स्कन्धः ॥१०॥ समाप्तं चेदं नलायनं महाकाव्यम् । अस्य दशस्कन्धाः ।। शतं सर्गाः । पादोन-षट्सहस्री श्लोकसंख्या ॥ इति ज्ञेयम् ॥ शुभं भवतात् ॥ जयपुरे ॥

104. श्रीकण्ठचरितं सटीकम्

OPENING : ॥ श्रीगणेशाय नमः ॥

उदेति यस्यां प्रकटीभवन्त्यां तिरोहिताभ्यां गलतीव विश्वम् ।
रविप्रभेवास्तु तमो हरन्ती दृशः प्रबोधाय सरस्वती वः ॥
श्रीलौलराजसुतपण्डितभट्टनोन-
राजात्मजः सहृदयैर्विहिताभ्यनुज्ञः ।
काव्ये पुरारिचरिते कुरुतेऽभियोगं,
वाच्यार्थमात्रविवृतिं प्रति जोनराजः ॥

× × ×

(मूल) जीयात् कृतानङ्गपतङ्गदाहः खट्वाङ्गिनो नेत्रशिखिप्रदीपः।
यस्यान्तिके शुभ्रदशानिवेशश्रियं किरीटेन्दुकराः श्रयन्ते ॥१॥

CLOSING : सन्तो नयन्ति गुणतां खलु दोषजातं
जातेति चापलकलासु मम प्रवृत्तिः ।
चारां पतिस्त्यजति चेत् स्वकृतां व्यवस्थां,
कीर्त्तिः स्थितिं श्रयति कस्य जगत्प्रसिद्धा ॥
श्रीकण्ठकाव्यविवृतिं विरचय्य जोन—
राजस्सतो नमति यत्नमतिप्रतिष्ठः ।
हेलास्तु वस्तदपि यत्नमकार्षमस्यां,
दीपो बिलान्ध्यहरणात्तरणेस्समः किम् ॥

COLOPHON : इति श्रीकण्ठचरितटीकायां पण्डितलोलतनयपण्डितनोनराजतनय-

श्रीजोनराजकृतायां पञ्चविंशः सर्गः। समाप्तम्। समाप्तमिद श्रीकण्ठचरितं काव्यम् पत्राणि २३५ श्लोकाः ७००० ।

105. शङ्करदिग्विजयसारः

OPENING : ॥ श्रीगणेशाय नमः

सत्यं ज्ञानमनन्तमाद्यममलं वेदान्तवेद्यं परं,
मायातीतमभेद्यमान्तरमजं सर्वज्ञमीड्यं सुखम्।
आराध्यं विधिशङ्करादिभिरपि रोगापहं केशवं,
वन्दे भक्तजनप्रियं सुरगुरुं कृष्णं श्रिया संयुतम् ॥१॥
यन्नामामृतमेव सर्वजनताबुद्धौ परं शङ्करं,
यद्ध्यानामृतमेव साधनतया चित्ते विधेयं जनः।
यज्ज्ञानामृतमेव सर्वविदुषां पाण्डित्यसम्पादकं,
तद्धामामृतमेव शाङ्करमहं वन्दे दयार्द्रं महः ॥२॥

CLOSING : इति भवभयहंत्री ब्रह्मविद्याजनित्री,
निगमरसधरित्री भ्रान्तिहर्त्री मुमुक्षोः।
निरवधिसुखदात्री शान्तिदा सज्जनामी(नाम्),
जयतु निगमवेद्या सं [शं] भुचर्यश्रमांते ॥६८॥
रसगुणवसुचन्द्रे विक्रमादित्यराज्यात्,
समफलवति वर्षे चाश्विने मासि शुद्धे।
श्रवणयुतदशम्यां भौमवारे विलग्ने,
ग्रथित इति निबन्धः सिद्ध ईशप्रसादात् ॥७०॥

COLOPHON : इति श्रीशाङ्करदिग्विजयसारे श्रीमन्मुकुन्दपदारविन्दमकरन्दरसाभिलाषिसदानन्दाख्यविरचिते अनुक्रमणिकावर्णानं नाम सप्तदश सर्गः ॥१७॥

Post-Colophonic : संवत्सर १९४५ वैषाषसुदी १० सो० ।

106. अमन्दमन्दाकिनीशतकम्

OPENING : ॥ श्रीकृष्णाय नमः ॥

वाग्देवी चतुरास्यपञ्चवदना नित्यं सहस्राननो-
प्युच्चैर्यत्र जडात्मतामुपगताः केन्ये वराकाः सुराः।

मर्त्याः स्वल्पधियः कथं नु कुशलास्तत्राप्यहं प्रज्ञया,
हीनः किङ्करवाणि तां व्रजकुलोत्तंस प्रशंसां तव ॥१॥

CLOSING : ये पाण्डित्यकवित्वसूनुधरणीधर्मार्थकामाणिमा-
दीशित्वेन्द्रपदाप्तिमोक्षमथवा वाञ्छन्ति भक्तिं हरौ ।
संभूता मधुसूदनप्रपदतः सन्तो भजन्त्वादरात्,
ते संसारदवाग्निदाहशमनीमानन्दमन्दाकिनीम् ॥१०२॥

COLOPHON : इति श्रीमन्नन्दनन्दनपदद्वन्द्वसमुदञ्चन्नखचन्द्रचन्द्रिकाचयपानमत्तचित्तचकोरश्रीमधुसूदनसरस्वतीविरचितानन्दमन्दाकिनी संपूर्णं शुभं भवतु ।

Post-Colophonic : संवत् १९४२ का द्वितीय ज्येष्ठ शुक्ला २ रविवासरे लिखितं कासीनाथेनशर्मणा सवाई जयनगरमध्ये ।

107. काव्यभूषणशतकम्

OPENING : ॥ श्रीमद्गणेशगीर्गुरुभ्यो नमः ॥

हेरंबस्य कपोलसीम्नि मलिनां मालामलीनां छना(टा)—
मालोक्य प्रतिबिम्बितां हरशिरोगङ्गातरङ्गोपरि ।
न्यस्तानेन कलिन्दजापि शिरसीतीर्ष्याकुला या मरु—
द्वला(द्वेल्ल)त्कोकनदच्छदद्युतिभृतो देव्या दृशः पान्तु वः ॥१॥
श्रीकृष्णे सत्यभामाकुचकलशभुवि स्फीतमातङ्गकुम्भो—
त्तुङ्गायां पारिजातस्रजमुपनयति प्रेमभाजा करेण ।
तस्मिन् जंभाभियाति च्छिरदकरधि विस्मृतेर्ष्या रसाया (?)
रुक्मिण्याः क्लान्तभृंगावलिललितरुचः पान्तु दृग्भंगयो वः ॥२॥

CLOSING : अर्द्धेन्दुक्षतमर्द्दितस्समकृतप्रस्थानकस्थासकं,
विश्लिष्टावरणं रदव्रणगणैः साबाधबिम्बाधरम् ।
स्वेदाम्भःपृषताभिमृष्टतिलकं शस्तोरुयुग्मं जय—
त्यामीलन्नयनाञ्चलं परिगलद्भ्रूस्मिच्छकं तद्वपुः ॥१०२॥
विद्वद्वृन्दकमौलिभूषणलसत्पाण्डित्यलीलाञ्चित—
श्रीमच्छ्रीधरभट्टसूनुरमलप्रज्ञाधराराधितः ।

भट्टश्रीयुतकृष्णवल्लभसुधीर्वर्षे शरेद्वा(ष्व)ष्टभू (१८५५)
मानेकाव्यविभूषणाभिधमिदं काव्यं व्यधादद्भुतम् ॥१०३॥

COLOPHON : इति श्रीकृष्णवल्लभविरचितं काव्यभूषणशतकं समाप्तम् शुभम् ॥

Post-Colophonic : संवत् १९४२ का भाद्रपद कृष्ण १० भृगुवासरे लिपीकृता काशीनाथ-शर्मणा सवाई जयनगरे लेखकपाठकयोः शुभं ।

110. राजेन्द्रकर्णपूरः

OPENING : ॥ श्रीगणेशाय नमः ॥

बद्धस्पर्द्धः क्षितिधरसुताभ्रूलतावक्रतायां,
भूयाद् भूत्यै तव हर शिरःशेखरो रोहिणीशः ।
यं निष्पीड्य स्तनमुखनखोल्लेखरेखासु देव्याः,
संभोगान्ते वितरति सुधास्यंदमर्द्धेन्दुमौलिः ॥१॥

CLOSING : पीयूषद्रवहारिणी सुमनसां भ्रूलास्यविस्तारिणी,
त्वत्सेवाभिरवापि काप्यभिनवा वाग्देवते भारती ।
अस्त्येका तु कृताञ्जलेर्जननि मे शम्भोरियं प्रार्थना,
मद्वाचां क्वचिदस्तु वस्तुनिपुणः श्रोता सचेता जनः ॥७५॥

COLOPHON : इति श्रीकाश्मीरदेशोद्भवशम्भुकविविरचितो राजेन्द्रकर्णपूरः समाप्तः शुभम् ।

पुस्तकलिखनपरिश्रममेको जानाति लेखको नान्यः ।
सागरलङ्घनखेदं हनुमानेकः परं वेद ॥

Post-Colophonic : शुभमस्तु संवत् १९४२ का द्वितीयज्येष्ठ शुक्ल ९ रवौ लिखितं लेखकेन ।

116. सरोजसुन्दरम्

OPENING : ॥ ॐ श्रीगणेशाय नमः ॥ चंडिकायै नमः ॥ ॐ

शिवा यतो दीनदयापरायणे सति प्रचा(धा)नेशितयावृतक्षतिः ।
शिवार्चितोग्रप्रकटीकृतक्रतो(तुर्) दयानिधिः सर्वपतिर्भु(र्भ ?)वत्यजः ॥१॥

सरोजसुन्दरं नाम स्मृतिसारमिमं बुधाः।
सेवयन्तु सदा शान्ताः सर्वसन्देहशान्तये ॥२॥
क्षौरे तैलं जलं चोष्णमामिषं निशि भोजनम्।
रतिःस्नानञ्च मध्याह्ने रवौ सप्त विवर्जयेत् ॥३॥

CLOSING : धनिकः श्रोत्रियो राजा [न] दी वैद्यश्च पञ्चमः।
पञ्च यत्र न विद्यन्ते न तत्र दिवसे वसेत् ॥
असी(सि)जीवी मसीजीवी रादेशी रसविक्रयी।
पुरोहितः पाककर्त्ता च षडेते ब्राह्मणाधमाः ॥
यादृशं पुस्तकं दृष्टात्तादृश्यं लिखितं मया।
यद्विशुद्धमशुद्धं वा मम दोषो न दीयते ॥

Post-Colophonic : संवत १८८० शुक्रे।

117. सेव्यसेवकोपदेशः

OPENING : ॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

विभूषणाय महते तृष्णातिमिरहारिणे।
नमः सन्तोषरत्नाय सेवाविषविनाशिने ॥१॥
उत्सृज्य निजकार्याणि सद्भिर्बाष्पाकुलेक्षणम्।
सेव्यसेवकसेवानां क्रियतामनुशासनम् ॥२॥
दर्पादिकः परो लोभाद् द्वावन्धौ सेव्यसेवकौ।
धनोष्मदैन्यविकृती मुखे कः कस्य पश्यति ॥३॥
दुर्वारमोहलोभान्धो यदि न स्यादयं जनः।
कः क्रूरक्रोधविधुरं सहेत धनिनां मुखम् ॥४॥

CLOSING : वृत्या जीवति लोकः सेवावृत्तिर्निजैव केषांचित्।
अस्थाने तीव्रतरा निंद्या तु तदर्थिनां सेवा ॥६१॥
विद्वज्जनाराधनतत्परेण सन्तोषसेवारसनिर्भरेण।
क्षेमेन्द्रनाम्ना सुधिया सदैव सुखाय सेवावसरः कृतोऽयम् ॥६२॥

COLOPHON : इति श्रीव्यासदासापरनामक्षेमेन्द्रकृतिकृतः सेव्यसेवकोपदेशः समाप्तः ॥शुभम्॥

Post-Colophonic : सं० १६४२ का द्वितीय ज्येष्ठ कृष्ण १२ बुधवासरे लिपीकृता कासिनाथेन।

118. अन्योक्तिमुक्तामाला(लता)

OPENING : ॥ ॐ ॥ श्रीगणेशाय नमः ॥

मानं मुञ्च विपञ्चिपञ्चमरवन्यक्कारपारङ्गमा—
माभूवन् कलकण्ठकण्ठकुहरे कुण्ठक्रमास्ते गिरः ।
प्राप्तः पञ्चशरः प्रपञ्चशरणं यद्भ्रंगभङ्गीगुरु—
र्बन्धूकप्रियबान्धवो धवलितः श्यामाधवो माधवः ॥१॥

× × × ×

सत्यं सन्ति कियन्ति सन्ति न सखे रत्नानि रत्नाकरे,
सञ्जातस्तु स वस्तुतस्स्तुतिकथापात्रं परं कौस्तुभः ।
यो जातः स्मरकेलिलोलकमला सोल्लासदोःकन्दली,
लीलालिङ्गनभाजनं भगवती वक्षःस्थले शार्ङ्गिणः ॥३॥

CLOSING : या लक्ष्मीः स्मरकामुके स्फुरति या बाल्ये प्रबाले रुचि—
र्या नीलाम्बुरुहच्छदे मृदुमरुत्प्रेंखोल्लिते विभ्रमः ।
या कान्तिः कनकाम्बुजेऽपि सकलं द्रष्टुं तदैकत्र चे—
च्चेतः कन्दलिताद्भु तं तव सखे पश्याननं सुभ्रुवाः ॥१०८॥

COLOPHON : इति श्रीशम्भुकविकृता मुक्तालता समाप्ता । शुभं भवतु ।

Post-Colophonic : संवत् १६४२ का असाढ कृष्ण ३ भौमे लिखितमिदम् ।

119. अन्योक्तिशतकम्

OPENING : ॥ श्रीगोपीजनवल्लभाय नमः ॥

प्रोन्मीलल्लोलमौलिश्लथविकटजटाजालमालोक्य मुह्यन्,
गंगासंपातजातश्रमभरविवशो विक्षिपन् लोचनानि ।
आकर्षन् मौक्तिकालीं गिरिवरदुहितुः कण्ठसीमांतरुच्चैः,
प्रातः श्रीहैमवत्या तदनु विहसितो लज्जितः पातु शम्भुः ॥१॥
पत्रं मुग्धतरं फलं सुमधुरं सौरभ्यमप्युन्नतं,
चञ्चत्काञ्चनजित्वरं पुनरहो त्वत्केसरं सुन्दरम् ।

लावण्यं पुनरुत्तमं किमपरं किन्तु स्फुरत्कण्टक—
व्यग्रं नालमिदं सरोरुहपरं तेनातिदूयामहे ।।२।।

CLOSING : चन्द्रो हन्त कलङ्कशङ्कितततनुः क्षीरान्वितः सागरो,
हंहो कल्पतरुस्तरुः पुनरहो मेरुः स्वयं पर्वतः ।
कामं कामगवी पुनः पशुरहो किं वा बहु ब्रूमहे,
संसारे भवतस्तुलां कलयितुं को वा समर्थो भवेत् ।।१०३।।
योभूद्द्राविडचक्रवर्त्तिमुकुटालङ्कारभूतस्य रे,
मौद्गल्यस्य हरेः सुतः क्षितितले वीरेश्वरः सत्कविः ।
तस्य प्रोद्गतसूक्तिनिर्मलसुधाशुद्धान्तरस्य क्षणा—
देषा निर्मितिरुत्तमा मतिमतां नित्यं मुदे जायताम् ।।१०४।।

COLOPHON : श्रोः इति श्रीवीरेश्वरभट्टनिर्मितं अन्योक्तिशतकं समाप्तम् श्री ।
श्रुतो वंशीधीरध्वनिरनुमितं कुञ्जभवनं,
विलामोंतर्ध्यातो रतिपतिरभूदक्षिविषयः ।
गता नीवी मुक्ति हृदयमिदमद्वैतमभजन् —
न जानीमः कोऽयं सखि मदनतंत्रस्य नियमः ।।१।।
सख्यः केलिगृहं विलासभवनं दूत्यस्त्रपा प्रेयसो—
प्युत्संगं रतिसंगरस्मृतिरपि प्रापय्य मां निर्गताः ।
इत्यौचित्यमदर्शयन् प्रियसखि प्रीतेर्वयस्याः स्फुटं
नामुंचन्महती मया परिचिताप्येषा परं निर्वृतिः ।।२।।

Post-Colophonic संवत् १९४१ का चैत्रकृष्ण ३० चन्द्रवासरे हस्ताक्षरः कासोनाथस्य शुभं भवतु ।

120. सुभाषितार्णवो हिन्दीवचनिकायुतः

OPENING : ।। श्रों नमः सिद्धेभ्यः ।।

अथ सुभाषितार्णव संस्कृतग्रन्थ ताकी देशभाषामय वचनिका लिषिये है । तहा प्रथम धर्मपद्धतिका वर्णन करिये है ।
।। हंणा श्लोक ।। चन्द्रनाथं जिनं नत्वा जितघातिचतुष्टयम् ।
सुभाषितार्णवं वक्ष्ये ज्ञानविज्ञानकारणम् ।।१।।

अर्थ—इहाँ ग्रन्थकर्त्ता ग्राचार्य श्रीसकलकीर्तिनामा है। सो इस सुभाषितार्णवनांम ग्रन्थ की ग्रादिविषै मंगलकै निमित्त इष्टदेव ग्रातमां तीर्थंकर चन्द्रप्रभनांमा जिनेंद्र कूं नमस्कार करि ग्रर सुभाषितार्णव नांम ग्रन्थकौ करुं हूं ॥०

CLOSING : ॥ दोहा ॥ तिनका जो संबंध मैं, चौधरि पन्नालाल ।
श्रावककुल विख्यात है, पांडया खंडिलवाल ॥१५॥

॥ शार्दूलयुग्म ॥

गुप्यारामजि चौधरी गुणिवरी जिनके सगे पुत्र हैं,
जो छाजूलालजि पापल्या ग्ररु तथा दासी नथूलालजी ।
डेडा का वसती सदासुखजि जो जो कासलीवाल है,
इन्की संगति पायकैं गुणकलासंयुक्त विद्या पढ़ी ॥१६॥
व्याकृत्यादि समस्तशास्त्र जिनकै बोधावली कीजहै,
पन्नालाल जु चौधरी जयपुरें ग्रभ्यास विद्या करै ।
छाजूलालजि ग्रादि तो समय यां पंचत्व कूं प्राप्त है,
पश्चात् धर्मरुची भई जिनकृपा भाई दुलीचंद कै ॥१७॥
इन्की सर्वसहाय सैं वचनिका वाकी रही हो कि ज्यो,
सारी संस्कृतग्रन्थकी ग्ररु तथा ज्यो प्राकृती मैं रही ।
केई ग्रंथनिकी वर्णी वचनिका भाषामयी देशकी,
पन्नालालजु चौधरी विरचि जो कारक दुलीचंदजी ॥

॥ दोहा ॥ पन्नालाल सु चोधरी, रची वचनिका सार ।
सुभाषितार्णव की या, निजमति कै ग्रनुसार ॥

इति श्रीपीठिका समग्रं: ॥

127. प्राणाभरणम्

OPENING : ॥ श्रीगणेशाय नमः ॥

विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।
ग्रास्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरी मधुरयन् वाचां विलासो मम ॥१

विद्वांस इत्यादि प्रायदशनाभिप्रायमेतत्, तेन सहृदयेन मनागपि विमनायितव्यम्, भावध्वनिश्चायं उत्तरार्द्धप्रतिपाद्यार्थालम्बनाया एतद्य-प्रयोगानुभावायाः कविगतचिन्तायाः प्राधान्येनाभिव्यक्तः अनुपात्तोभयनिमित्तको व्यतिरेकः स्फुटोलङ्कारः। कामालसत्वं वामाविशेषणमधरमाधुरी-प्रकर्षकम्।

CLOSING : तैलङ्गान्वयमङ्गलालयमहालक्ष्मीदयालालितः
श्रीमत्पेरमभट्टसूनुरनिशं विद्वल्ललाटन्तपः।
सन्तुष्टः कमताधिपस्य कवितामाकर्ण्य तद्वर्णनम्,
भूयः पण्डितरायपण्डितजगन्नाथो व्यधासीदिदम् ।।५२
दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डाशुग-
ध्वस्तोद्दण्डविपक्षमण्डलमथ त्वां वीक्ष्य मध्येरणम्।
बलगद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत् ।।५३
अत्र स्मरणमलङ्कारः। भाव इति तु न भ्रमितव्यम्। सादृश्य-मूलकत्वात्तन्मूलकत्त्वाभ्यां भावत्त्वालङ्कारत्वयोरिह व्यवस्थितेः शब्दवेद्यत्वाच्च।

COLOPHON : इति श्रीमत्पण्डितरायजगन्नाथविरचितं प्राणाभरणं समाप्त शुभमस्तु।

Post-Colophonic : संवत् ९४२ का श्रावणशुक्ल १४ चन्द्रवासरे लिपीकृता काशीनाथ-शर्म्मणा शुभम्।

133. वैद्ययोगमाला हिन्दीटीकायुता

OPENING : ।। गुरुचरणारविन्देभ्यो नमः ।।
जयति जगति विष्णुः श्रीनृसिंहाख्य एषो-
दितिजदनुजदावच्छालनांतःकृशानुः
सकलनिजजनानां ज्ञानविज्ञानहेतोः,
प्रकटितनिजदेहं तं हरिं सन्नतोऽस्मि ।।१।।
× × × ×
आनन्दभारतीनाम्ना यतीन्द्रेण प्रकाश्यते।
आनन्दार्थं पण्डितानां आनन्दस्यानुमालिका ।।३।।

CLOSING : क्वाथाधिकारः प्रथमः, रसाधिकारद्वितीयोल्लासः, व्रणाधिकारतृतीयोल्लासः, गुटिकाधिकारो नाम चतुर्थोध्यायः, अवलेहाधिकारः पञ्चमः, अवलेहासवफांटाधिकारःषष्ठः, घृताधिकारः सप्तमः, तैलाधिकारः अष्टमः,

विरेचनाधिकारः नवमः, अंजनाधिकारः दशमः, नस्याधिकारः एकादशः, रक्तमोक्षाधिकारः द्वादश, नक्षत्ररोगपान(ज्ञान)मामा(नामा)त्रयोदशाधिकारः, धात्वधिकारः चतुर्दशोध्यायः समाप्तः ।। सर्वपत्रसंख्यारी संयुक्तपत्र ६६ शुभं भवतु ।।

Post-Colophonic : संवत् १६३३ वर्षे मिती वैशाख सुदि ३ अखेतृतीया लिखतं डोडवाणा-मध्ये व्यासमुखनिधान तस्य मुकुन्दलाल स्वार्थः ।।श्रो।।श्रो।।श्रो।।

134. आतङ्कतिमिरकौमुदी

OPENING : ।।र्द्दं०।। श्रीगणेशाय नमः ।।

विघ्नवृततिविध्वंसकारिणं दुःखहारिणम् ।
.... नमस्कुर्वे विघ्न ... द्धये ।।१।।
प्रयोगसारप्रमुखागमेषु प्रोक्तेषु शास्त्रेषु च सुश्रुताद्यैः ।
यदुक्तमेकत्र विनित्यवत्ते(निर्मिते)ऽस्मिन् ग्रन्थे तत्खलु बालतन्त्रे ।।२।।
अष्टौ दोषास्तु नारीणां नवमं पुरुषस्य च ।
रक्तपित्तं तथा वातं श्लेष्मां च सन्निपातकम् ।।३।।
ग्रहदोषविकारेण देवतानां प्रकोपने ।
अभिचारकृतै रेतोहीनवीर्यपुमांस्तथा ।।४।।

CLOSING : इति बालतंत्रे षोडशवंध्यावीर्यवृद्धि[ग]र्भाधानकालरुद्रस्नानगर्भिणी-रक्षा-प्रसवोपायबलग्रहहरं- मासग्रहरक्षा - दिनमासवर्षग्रहरक्षा - बालग्रहोपायः समाप्तः पटलः ।।

ग्रन्थान् विलोक्य प्रचुरप्रयोगान् पद्यैः स्वकीयैः कतिचित्तदीयैः ।
श्रीरामचन्द्राचनभक्तियुक्तो(क्तः) श्रीरामदासः शुभबुद्धियुक्तः ।।
विद्वज्जनाह्लादकरो मनस्वी महीधरः सर्वजनाभिवन्द्यः ।
लक्ष्मीनृसिंहांघ्रिसरोजभृंगस्तदात्मजोऽभूद्विदितागमार्थः ।।२।।
कल्याण इत्युद्गतनामधेयस्तदात्मजो ग्रन्थवरान् विलोक्य ।
परोपकाराय बबन्ध तंत्रः(त्रं) सतांस्तमालोकनयोगमेतत् ।।३।।

COLOPHON : इति श्रीमन्मिश्रमनसारामस्य पुत्रचैनरामविरचितायामातंक-तिमिरकौमुद्यां चतुर्थोध्यायः ।। बालतत्रे नानारोगकथनो नाम एकादशः पटलः संपूर्णः ।।

Post-Colophonic : संवत् १७६८ दर्षे मार्गसिरकृष्णपक्ष्यां ६ षष्ठी तिथौ संपूर्णं ।। श्री-सवाई जयपुरमध्ये लिपीकृतमस्ति ।।

138. रसराजलक्ष्म

OPENING : ।। श्रीगणेशाय नमः ।। श्रीगुरुभ्यो नमः ।।

आनन्दैकरसे विकल्पकलनानिर्मुक्तबोधात्मक,
प्रागत्यावधिसंगतिव्यपगते शुद्धे सतत्त्वे शिवे ।
निर्व्योमानिलवह्निवारिधरणिव्राते स्फुरच्छक्तिके-
यस्मिन् विश्व उदेति तिष्ठति लयं यान्ति स्तुमस्तां शिवाम् ।।१।।
दृष्ट्वेमं रससागरं शिवकृतं श्रीकाकचण्डीश्वरो—
तंत्रं सूतमहोदधिं रससुधाम्भोधिं भवानीपतिम् ।
व्याडिं शु(सु)श्रुतस्त(तं)त्रमीशहृदयं स्वच्छं स्व(द)शक्त्यागमम्,
श्रीदामोदरवासुदेवभगवद्गोविन्दनागार्ज्जुनान् ।।२।।
आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ।।३।।
महारसाः स्युस्तत्रादौ अष्टौ पारदहिंगुले ।
वैष्णवं सस्यकं शैलं चपलं रसकोमलम् ।।
अभ्रकं थुत्थखं कान्तं राजावर्त्तमथांजनम् ।
वज्रं वैक्रान्तकं चेति टंकणं च रसान् विदुः ।।

CLOSING : एतै[ं]द्विदोषोथसमस्तदोषोप्यसमस्तदोषा
विह्लविमिश्रै[ं]भिषजां बधायोः । (?)
नाडी यथाकालमपि त्रयाणां
प्रकोपशान्यादिभिरेव भूयः ।।८९।।

COLOPHON : इति श्रीविष्णुदेवविरचितो रसराजलक्ष्म संपूर्णं ।।

Post-Colophonic : संवत् १८४४ शाके ७०९
लिषितं श्रीनिवासेन परात्मपठनार्थकम् ।
श्रावणस्य सिते पक्षे तृतीयाकुजवासरे ।। श्रीरस्तु ।।

139. निघण्टुराजः

OPENING : श्रीकण्ठाचलश्रृङ्गकेलिषु नटः कुम्भीन्द्रबुद्ध्या रदं,
प्रान्तान्तं संभृताब्दगलितैः शीतो(तं)पयोबिन्दुभिः
निर्वाणे मदसंभरे प्रमुदितस्तेनातपत्रश्रियं,
विभ्राणेन निरत्ययं दिशतु वः [श्री]विष्णुराजो मुदम् ।।१।।

× × × ×

शम्भुं प्रणम्य शिरसाथ गुरूनुपास्य,
पित्रोः पदांबु(दाब्ज)युगले प्रणिपत्य भक्त्या ।
विघ्नेशितारमभिवन्द्य सरस्वतीं च,
प्रारंभवैद्यकहिताय निघण्ट एषः ॥४॥

CLOSING : प्रियंगुच्छिन्नात्रिदकणाह्वया बन्धूकदूर्वा तुलसो च नीलनी ।
दुर्वाखुखरोकामदकुष्ठसारिवा एतेषु श्यामाक कर विदुधा ॥२२॥

COLOPHON : इति श्रोनरहरिपंडितविरचिते निघंटराजनाम्न्यभिधानचूडामणौ एकार्थादिवर्ग, त्रयोविंशतितमः ॥२३॥ समाप्तमिदं ग्रंथं श्रोसरस्वतोप्रसादात् ॥ श्रीकल्याणमस्तु ॥

Post Colophonic : संवत् १८३६ वर्षे प्रथमश्रावण मासे शुक्लपक्षेति त्रयोदशायां चन्द्रवासरे लिषतं जीबणरामपंडाः लिषावतंशी ।

158. होराकौस्तुभः

OPENING : ॥ श्रीगणेशाय नमः ॥

अथ तन्वादीनां द्वादशभावानां षड्वलैक्यानि सपरिकराणि लेख्यानि तथा तेषामुपयोगस्तद्विचारे । अथ तन्वादिद्वादशभावानां सप्तवर्गान् विधाय भावसप्तवर्गीचक्रं लेख्यम् । अथ सहजभाववर्णकान्तिगुणप्रधानवंधुसुख पुत्रकलत्रधर्माधर्मजीवितोपायव्ययभावमित्रामित्रादिसकलसांसारिकपदार्थास्तित्वनास्तित्वसाम्यतानिर्णयोपयोगित्वेन सर्वजातकफलेषु वरिष्ठो भावविचार आरभ्यते । उक्तं च—

सांसारिकं यत् किल वस्तुजातं कलत्रपुत्रादिकमस्ति नास्ति ।
भावेषु सम्यक् प्रविचारितेषु स्फुटो भवत्येवमृषिप्रवादः ॥१॥

अत्र किं विचार्यम्—

रूपं तथा वर्णविनिर्णयश्च चिह्नानि जातिर्वयसः प्रमाणम् ।
सुखानि दुःखान्यपि साहसं च लग्ने विलोक्यं खलु सर्वमेतत् ॥

CLOSING : अजवृषकर्कटनक्रलग्ने रक्षति राहुः समस्तपीडाभ्यः ।
पृथ्वीपतिः प्रसन्नो यथा मितापराधात् पुरुषम् ॥२४॥
इति अरिष्टभङ्ग ॥

Post-Colophonic : इति संवत् १९१२ का ॥